अङ्कः (Vol.) I   वर्षम् (Year)-2011   ISSN 2231-5799

संस्कृत-वाङ्मयी

SANSKRITVĀṄMAYĪ

(Research Journal)

सम्पादकः

प्रो. बृजेशकुमारशुक्लः

आचार्योऽध्यक्षश्च

संस्कृतप्राकृतभाषाविभागः

लखनऊविश्वविद्यालयः, लखनऊ

Editor

Prof. BRIJESH KUMAR SHUKLA

Professor & Head

Deptt. of Sanskrit and Prakrit Languages

Lucknow University, Lucknow

संस्कृतप्राकृतभाषाविभागः

लखनऊविश्वविद्यालयः, लखनऊ-226007

Deptt. of Sanskrit and Prakrit Languages

Lucknow University, Lucknow-226007

अङ्कः (Vol.) I वर्षम् (Year)-2011 ISSN 2231-5799

संस्कृत-वाङ्मयी

SANSKRITVĀṄMAYĪ

(Research Journal)

सम्पादकः

प्रो. बृजेशकुमारशुक्लः

आचार्योऽध्यक्षश्च
संस्कृतप्राकृतभाषाविभागः
लखनऊविश्वविद्यालयः, लखनऊ

Editor

Prof. BRIJESH KUMAR SHUKLA

Professor & Head
Deptt. of Sanskrit and Prakrit Languages
Lucknow University, Lucknow

संस्कृतप्राकृतभाषाविभागः

लखनऊविश्वविद्यालयः, लखनऊ-226007

Deptt. of Sanskrit and Prakrit Languages
Lucknow University, Lucknow-226007

प्रकाशकः

प्रो. बृजेशकुमारशुक्लः
आचार्योऽध्यक्षश्च
संस्कृतप्राकृतभाषाविभागः,
लखनऊविश्वविद्यालयः, लखनऊ

मूल्यम् - रु. १००
वार्षिकशुल्कम् - रु. १००
आजीवनशुल्कम् - रु. २१००

मुद्रकः-

लेजर ग्राफिक्स, २१४, प्रिन्स काम्पलेक्स, हजरतगञ्जम्, लखनऊ

अङ्कः (Vol.) I वर्षम् (Year)-2011 ISSN 2231-5799

संस्कृत-वाङ्मयी

SANSKRITVĀṄMAYĪ

(Research Journal)

सम्पादकः

प्रो. बृजेशकुमारशुक्लः

आचार्योऽध्यक्षश्च
संस्कृतप्राकृतभाषाविभागः
लखनऊविश्वविद्यालयः, लखनऊ

Editor

Prof. BRIJESH KUMAR SHUKLA

Professor & Head
Deptt. of Sanskrit and Prakrit Languages
Lucknow University, Lucknow

संस्कृतप्राकृतभाषाविभागः

लखनऊविश्वविद्यालयः, लखनऊ-226007

Deptt. of Sanskrit and Prakrit Languages
Lucknow University, Lucknow-226007

प्रकाशकः

प्रो. बृजेशकुमारशुक्लः
आचार्योऽध्यक्षश्च
संस्कृतप्राकृतभाषाविभागः,
लखनऊविश्वविद्यालयः, लखनऊ

मूल्यम् - रु. १००
वार्षिकशुल्कम् - रु. १००
आजीवनशुल्कम् - रु. २१००

मुद्रकः-

लेजर ग्राफिक्स, २१४, प्रिन्स काम्पलेक्स, हजरतगञ्जम्, लखनऊ

बी. एल. जोशी
राज्यपाल, उत्तर प्रदेश

राज भवन
लखनऊ–227 132

दिनांक : 23 सितम्बर, 2011

सन्देश

मुझे यह जानकर अतीव प्रसन्नता हुई कि लखनऊ विश्वविद्यालय के संस्कृत प्राकृत भाषा विभाग द्वारा शोध–पत्र "संस्कृत वाङ्मयी–2011" का प्रकाशन किया जा रहा है।

वस्तुतः भारतीय संस्कृति एवं आध्यात्म के मूल तत्व संस्कृत भाषा में ही है। संस्कृत साहित्य ज्ञान का विशाल भंडार है। विषय–वस्तु इतनी प्रचुर है कि विश्व का कोई भी साहित्य इसकी तुलना करने में सक्षम नहीं है। ऐसा कोई भी विषय छूटा नहीं है, जिसका समावेश संस्कृत साहित्य में मौजूद न हो। सत्य तो यह है कि सभी भारतीय भाषाओं की जननी ही संस्कृत भाषा है।

"संस्कृत वाङ्मयी–2011" शोध–पत्र के सफल प्रकाशन के लिए मैं अपनी हार्दिक शुभकामनाएँ प्रेषित करता हूँ।

बी.एल.जोशी

(बी0एल0 जोशी)

प्रोफेसर मनोज कुमार मिश्र
कुलपति
PROFESSOR M.K. MISHRA
F.A.Sc,F.N.A.Sc
VICE-CHANCELLOR

लखनऊ विश्वविद्यालय
लखनऊ–226007
UNIVERSITY OF LUCKNOW,
LUCKNOW-226007
(U.P.) INDIA

सन्देश

मुझे यह जानकर अत्यधिक हर्ष हुआ कि संस्कृत भाषा–विभाग, लखनऊ विश्वविद्यालय द्वारा वार्षिक शोध–पत्रिका (रिसर्च जर्नल) **''संस्कृतवाङ्मयी''** का प्रकाशन किया जा रहा है।

संस्कृत वाङ्मय का एक–एक ग्रन्थ गीता और उपनिषद् की तरह विविध रहस्यों से युक्त है जिसका शोध और अनुसंधान आज के युग में बहुत उपयोगी है। **''संस्कृतवाङ्मयी''** के प्रकाशन से संस्कृत में निहित इन रहस्यों का इस प्रकार उद्घाटन होगा कि संस्कृत के क्षेत्र में अनुसंधान कार्य को एक नयी दिशा प्राप्त होगी तथा संस्कृत में निहित ज्ञान–विज्ञान के विविध विषयों का उद्घाटन करके उन्हें समाजोपयोगी व्यावहारिक दृष्टि प्रदान की जा सकेगी। अतः **''संस्कृतवाङ्मयी''** नामक रिसर्च जर्नल के प्रकाशन से सम्पूर्ण संस्कृत जगत् उपकृत होगा। इसके सफल प्रकाशन हेतु सम्पादक साधुवाद के पात्र हैं तथा स्वर्णिम भविष्य के प्रति मेरी हार्दिक शुभकामनाएँ हैं।

अक्टूबर 31, 2011

मनोज कुमार मिश्र

(मनोज कुमार मिश्र)
कुलपति

प्रो. बृजेश कुमार शुक्ल
सम्पादक ''संस्कृतवाङ्मयी'' तथा अध्यक्ष,
संस्कृत तथा प्राकृत भाषा-विभाग,
लखनऊ विश्वविद्यालय, लखनऊ

प्रो. राजेन्द्र मिश्र
पूर्व कुलपति
सम्पूर्णानन्द संस्कृत विश्वविद्यालय,
वाराणसी–२२१००२

दूरलेख : 'श्रुतम्'
दूरभाष कार्यालय : (०५४२) २२०४०८९
: (०५४२) २२०४२१३
निवास : (०५४२) २२०६६१७
: (०५४२) २२०७४५७
: (०५४२) २२०६६१७
E-mail : vcssvv_vns@satyam.net.in

दिनाङ्क २६.५.२०११

नान्दीवाक्

प्रिय प्रो. शुक्ल
हार्दिक आशीः एवं शुभकामनायें।

यह जान कर हार्दिक उल्लास का अनुभव कर रहा हूँ कि आपके वत्सल संरक्षण एवं नित्य-जाग्रत आध्यक्ष्य में संस्कृत-विभाग लखनऊ विश्वविद्यालय शोध-पत्रिका 'संस्कृतवाङ्मयी' के प्रकाशनार्थ प्रस्तुत है। यह, निमित्तदृष्ट्या तो आपके अभ्युदय का सूचक सन्दर्भ है परन्तु उपादानदृष्ट्या समूचे संस्कृत-जगत् का मङ्गलसूचक वृत्त है। कृपया एतदर्थ मेरी हार्दिक बधाइयाँ एवं शुभकामनायें स्वीकार करें।

आप आचार्य अय्यर, आचार्य कान्तिचन्द्र पाण्डे, आचार्य सत्यव्रत सिंह एवं प्रो. मिश्र, प्रो. कालिया के उत्तराधिकारी हैं। आपमें स्वाध्याय एवं विनय के साथ ही साथ कारयित्री प्रतिभा का भी मञ्जुल सन्निवेश है। अतः आपसे संस्कृत-जगत् को प्रभूत आशायें हैं। मेरा हार्दिक लगाव आपसे है। यह सारस्वतोपक्रम चिरजीवी हो, यही आकांक्षा है।

सस्नेह
अभिराजराजेन्द्रमिश्र

प्रो. अशोक कुमार कालिया
पूर्व कुलपति
सम्पूर्णानन्द संस्कृत विश्वविद्यालय,
वाराणसी—२२१००२

दूरभाष : (0522) 4041435
मोबाइल : 09889816504
E-mail : a.kalia@rediff.com
'श्रीनिवासः',बी—1/19, कल्याणविहार
(सेक्टर 'के'), अलीगंज, लखनऊ—226024

॥श्रीः॥

शुभाशंसाः

लखनऊविश्वविद्यालयीय-संस्कृतप्राकृतभाषाविभागेन नूतनवस्त्राभरणभूषिता संस्कृतवाङ्मयी- नामधेया काचिच्छोधपत्रिका प्रकाश्यत इति विज्ञाय परमां मुदमवाप्तवानस्मि। अस्मादेव संस्कृतप्राकृतभाषाविभागात् पूर्वमपि कदाचिद् 'विमर्श' इति नाम्ना कदाचिच्च 'वाङ्मयी' इति नाम्ना पत्रिकाः प्रकाशिता अभूवन्। कालक्रमेण सा परम्पराऽवरुद्धा जाता, किन्त्विदानीं विभागाध्यक्षेण प्रो० बृजेशकुमारशुक्ल-महाभागेन कामपि विशिष्टकल्पनाशीलतामाश्रित्य व्यवस्थितरूपेणोच्चस्तरीयशोधपत्रिकास्वरूपानुरूपमेतत् पत्रिकाप्रकाशनकार्यं नूतनतया पुनरुपक्रान्तम् इत्यस्ति खलु महतो हर्षस्य विषयः। एतदर्थं प्रो. शुक्लमहाभागः साधुवादार्हः सर्वथा। देशे विदेशे च प्रसिद्धस्याऽस्य विभागस्य शोधक्षेत्रेऽस्त्यत्यन्तगौरवशालीतिहासो विशिष्टा परम्परा च। संस्कृत-प्राकृत-भाषाविभागस्याऽस्यैतद् वैशिष्ट्यं यथाऽक्षुण्णमवतिष्ठेत्तथा सर्वैरपि संस्कृतप्रणयिभिर्विभागीयच्छात्राध्यापकैः स्वधर्मबुद्ध्या प्रयतनीयम्। एतस्यां पृष्ठभूमौ 'संस्कृतवाङ्मयी'-पत्रिकायाः प्रकाशनमस्ति कश्चन महत्त्वपूर्णः स्पृहणीयश्च प्रयासः। पत्रिकासाफल्याय स्वकीया हार्दिक्यः शुभाशंसाः विनिवेदयेऽहम्।

आशासे विश्वसिमि च यत् पत्रिकेयं शोधक्षेत्र उत्तरोत्तरोत्कर्षं प्राप्स्यति इति।

अथ च-

नीरक्षीरविवेकिभिर्बहुमताऽऽप्यास्वादिताऽध्येतृभिः
नानाशास्त्रमहाब्धिमन्थजनिता पीयूषपूर्णा घटी।
तत्त्वान्वेषपरा प्रमाणपुषिता निष्पक्षतर्कान्विता
सेयं **संस्कृतवाङ्मयी** विजयतां विज्ञानमञ्जूषिका॥इति॥

अशोककुमार कालिया

(अशोककुमारकालिया)

प्रो. बृजेशकुमारशुक्लः
विभागाध्यक्षः
संस्कृतप्राकृतभाषाविभागः
लखनऊ विश्वविद्यालयः, लखनऊ

GRAMS : VIDYAPEETHA

Prof. HAREKRISHNA SATAPATHY
VICE CHANCELLOR

RASHTRIYA SANSKRIT VIDYAPEETHA
(University established under sec.3 of UGC Act, 1956)
TIRUPATI - 517 064 (A.P.)
(Accredited at A+ Level by NAAC)

Office : Ph.0877-2287680
Fax : 2287838
Residence : Ph. : 2287826
Fax : 2286349
E-mail : hks_vc@yahoo.co.in

"Centre of Excellence in the Subject of Traditional Sastras"

शुभसन्देशः

मानवसमाजं सत्पथे प्रवर्तयितुमनादिकालात् सुविस्तृतसंस्कृतवाङ्मयस्य महदवदानमनस्वीकर्तव्यम्। समाजसंस्कारकाः महापुरुषाः सन्मार्गदर्शकाः महर्षयश्च मानवीयं व्यवहारं नियन्त्रयितुं संस्कृतवाङ्मयस्य विस्ताराय प्रयतितवन्तः। यतो हि सुसंस्कृता वाणी सर्वथा पुरुषं भूषयति। तदुक्तं भर्तृहरिणा- "क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्" इति। अतः विविधरचनावैचित्र्येण सुसंस्कृतायाः वाण्याः प्रसारणेन संस्कृतसेवकैरस्माभिः मानवीयशोभावर्धनार्थं प्रयत्नः विधेयः। सन्दर्भेऽस्मिन् लखनऊविश्वविद्यालयीयसंस्कृतप्राकृतभाषाविभागीयानुकूल्येन "**संस्कृतवाङ्मयी**" नामिकाऽनुसन्धानपत्रिका प्रकाश्यत इति महतः हर्षप्रकर्षस्य विषय एषः। प्रयासोऽयं सर्वथा सर्वैरभिनन्दनीय एव।

संस्कृतवाङ्मये अनुसन्धानलेखप्रकाशनस्य महार्घे कालेऽस्मिन् ये केचन सारस्वतसाधकाः तदीयाभिनवचिन्तनपुरस्सरं संस्कृतवाङ्मस्य लुक्कायितं तथ्यं लोकलोचनगोचरीकरणे प्रयतन्ते; ते प्रतिभावन्तः महान्तः यशस्विन एव। ये च तत्कार्यभारं शिरसि निधाय साधकत्वेन भगवत्याः सरस्वत्याः समाराधने दत्तचित्ताः; तेऽप्यभिवन्द्याः पुनः पुनः।

अधुना "**संस्कृतवाङ्मयी**" इति शोधपत्रिका प्रो. बृजेशकुमारशुक्लमहोदयानां सम्पादकत्वे प्रथमाङ्करूपेण आत्मप्रकाशं कुरुते। अत्र विद्यमानाः शोधविषयाः विद्यार्थिनां विदुषामनुसन्धित्सूनां पाठकानाञ्च कृते नितरामुपादेया इत्याशासे। अस्य सारस्वतकर्मणः सफलतायै प्रयत्नरतेभ्यः सर्वेभ्यः साधुवादान् समर्प्य श्रीवेङ्कटाचलपतिः श्रीपतिः तिरुपतिः पत्रिकायाः अस्याः उत्तरोत्तराभिवृद्धये सहायको भवत्विति सम्प्रार्थये।

हरेकृष्ण शतपथी

(प्रो. हरेकृष्णशतपथी)

कुलपति
सम्पूर्णानन्द संस्कृत विश्वविद्यालय,
वाराणसी–२२१००२ (उ.प्र.)

दूरलेख : 'श्रुतम्'
दूरभाष :
कार्यालय : (०५४२) २२०४०८९
निवास : (०५४२) २२०४२१३
: (०५४२) २२०६६१७
फैक्स : (०५४२) २२०६६१७

दिनांक २१.५.२०११

शुभाशंसा

संस्कृत भारत की आत्मा है। इसमें ज्ञान-विज्ञान का विपुल भण्डार है। ज्ञान-विज्ञान की इस अमूल धरोहर को लक्ष्मणपुरी के लखनऊ विश्वविद्यालय ने संस्कृत एवं प्राकृत भाषा विभाग के माध्यम से संस्कृत भाषा में छिपे विपलु ज्ञान की निधि को विस्तारित करने का स्तुत्य प्रयास किया है, इसके लिये सर्वप्रथम विभाग के सभी सम्माननीय अध्यापकों को मैं अपना साधुवाद देता हूँ। मुझे यह जानकर अत्यन्त प्रसन्नता हुई कि संस्कृत प्राकृत-भाषा विभाग के सौजन्य से विभागीय अनुसंधान पत्रिका **संस्कृतवाङ्मयी का वर्ष २०११ के अंक का प्रथम प्रकाशन होने जा रहा है।** इसके प्रारम्भिक अवलोकन से ज्ञात होता है कि इसमें प्राचीन भारतीय वाङ्मय सम्बन्धी अध्ययन विषयों में वेद, व्याकरण, दर्शन, पुराणेतिहास, संस्कृति इत्यादि सन्दर्भों का आश्रय लेकर गहन विश्लेषण और विवेचन किया गया है, जो संस्कृत अध्येताओं के लिये अत्यन्त उपादेय है। वस्तुतः **"संस्कृतवाङ्मयी" अनुसंधान प्रधान निबन्धात्मक पत्रिका के होने से शोध अध्येताओं के लिये सहायक एवं ज्ञानार्जन की महत्त्वपूर्ण सामग्री है।**

शोधोपयोगी **संस्कृतवाङ्मयी** में अनेक संस्कृत शास्त्र के निपुण प्रतिष्ठित विद्वानों की रचना न केवल शोध-छात्रों अपितु संस्कृत जगत के लिये भी अत्यन्त महत्वपूर्ण है। **सम्पादक एवं प्रकाशक प्रो. बृजेश कुमार शुक्ल के सत्संकल्प हेतु बधाई देता हूँ कि उनके ऊर्जावान व्यक्तित्व के संरक्षण में विभाग प्रगति के नये मार्ग पर प्रशस्त हुआ है।** इसके साथ ही सम्पादक मण्डल के प्रत्येक सदस्यों को बधाई है। विशेष रूप से **प्रतिष्ठित विद्वानों के लेखन के लिये उनके तप और साधना के लिए भी मैं उन विद्वानों का अभिनन्दन करता हूँ।**

(प्रो. बिन्दा प्रसाद मिश्र)
कुलपति

आचार्यः रामानुज देवनाथः
कुलपतिः
Prof. Ramanuja DEVANATHAN
Vice Chancellor

जगद्गुरुरामानन्दाचार्य–
राजस्थानसंस्कृतविश्वविद्यालयः
मदाऊ, भांकरोटा, जयपुरम् (राज.)–302026
JAGADGURU RAMANANDACHARYA
RAJASTHAN SANSKRIT UNIVERSITY,
Madau, Bhankrota, jaipur (Raj.)-302026
Phone : 0141-5132001 (O)
0141-5132002 (R)
Website : jrrsanskrituniversity.ac.in

दिनाँक २४.५.२०११

वर्धतां भारती

आ नो भद्राः क्रतवो यन्तु विश्वतः- इति हि वेदघोषः। स च क्रतुराचार्यमुखाद्याति, आतश्च श्रुतिः-आचार्यवान्पुरुषो वेद इति। पुरा तद्धि कोशवान् आचार्य इति कीर्त्यते स्म। साम्प्रतं कोशेभ्योऽपि लघीयान् उपायः सूक्ष्मतरज्ञानप्राप्तये विद्यते शोधपत्रिकेति। ताहशाः पत्रिका बहुधा बहुत्र प्रकाश्यन्ते, परं काश्चनैव प्रतिष्ठां लभन्ते। ताहशीष्वन्मतमतां भजेतेयं शोधपत्रिका **"संस्कृतवाङ्मयी"** नाम्नी। इयं खलु लक्ष्मणपुरविश्वविद्यालयस्य संस्कृतप्राकृतभाषाविभागेन प्रकाश्यते। अत्रान्तर्गतानां निबन्धानां शीर्षकैरेव पत्रिकाया गुणः प्रतीतिं याति।

एतादृशोद्यमाय विद्वांसः आचार्य बृजेशकुमारशुक्लवर्याः विभागाध्यक्षाः तत्सहकर्मिणश्च भृशमभिनन्द्यन्ते। वर्धतां संस्कृतसेवेत्याशास्महे।

अशेषविघ्नशमनोऽनीकेश्वरोऽव्यात्।

श्रीकर-वृषभ-कृष्ण-षष्ठी
२३.०५.११

इत्थं
विदां वचनकरः
(रामानुजदेवनाथः)

FORM-IV

(See Rule 8)

1. Place of Publication	Deptt. of Sanskrit and Prakrit Languages Lucknow University, Lucknow
2. Periodicity of its publication	Yearly
3. Printer's Name	Prof. Brijesh Kumar Shukla
Nationality	Indian
Address	Professor & Head, Deptt. of Sanskrit and Prakrit Languages, Lucknow University, Lucknow
4. Publisher's Name	Prof. Brijesh Kumar Shukla
Nationality	Indian
Address	Professor & Head, Deptt. of Sanskrit and Prakrit Languages, Lucknow University, Lucknow
5. Editor's Name	Prof. Brijesh Kumar Shukla
Nationality	Indian
Address	Professor & Head, Deptt. of Sanskrit and Prakrit Languages, Lucknow University, Lucknow
6. Name and address of individual who own the newspaper and partners or shareholders holding more than one percent of the total capital	Head, Deptt. of Sanskrit and Prakrit Languages, Lucknow University, Lucknow -226007

I, BRIJESH KUMAR SHUKLA, hereby declare that the particulars given above are true to the best of my knowledge and belief.

December 07, 2011

Prof. BRIJESH KUMAR SHUKLA
Publisher

सम्पादकीयम्

गीर्वाणवाङ्मयस्याऽनुसन्धानवर्त्मनि कृताऽनुसन्धानसङ्कल्पा नैकाः संस्थाः शोधचिकीर्षूणां विदुषां ज्ञानप्रभाप्रसाराय विविधाऽनुसन्धानपत्रपत्रिकाणां सफलसम्पादने कृतभूरिपरिश्रमा दरीदृश्यन्ते। एतस्यामेवाऽक्षुण्णपरम्परायां विदुषां वंशवदोऽयं लखनऊविश्वविद्यालयीयसंस्कृतप्राकृतभाषाविभागोऽपि **'संस्कृतवाङ्मयी'**तिनामधेयाया वार्षिकाऽनुसन्धानपत्रिकायाः प्रकाशनाय कृतनिश्चयो जातः। एतस्मात्पूर्वमप्यनेन विभागेनाऽनुसन्धानपत्रिकाप्रकाशनमकारि किन्तु प्रायः सप्तवर्षेभ्यः प्रागेवेयं सरणिरवरुद्धा जाता। सम्प्रति **'संस्कृतवाङ्मयी'** त्यभिधानेनाऽस्या नवप्रसवमभिकल्प्य अन्ताराष्ट्रियाऽभिज्ञानेन (ISSN) सार्द्धं **रिसर्च जर्नल'**- रूपेणाऽनुसन्धानप्रसवोऽयं देववाणीवाङ्मयस्याऽनुसन्धानप्राङ्गणे प्रथमपुष्परूपेण प्राकाश्यमुपनीयते।

विषयवस्तुदृशा प्रौढतमैषा पत्रिका न केवलमत्रत्यानां लक्ष्मणपुरस्थाना-मनुसन्धातॄणामपितु विविधप्रदेशेषु प्रतिष्ठापितज्ञानयज्ञानां निखिलेऽपि भारतवर्षे लब्धप्रतिष्ठानामनुसन्धानतत्त्वमर्मज्ञानां सुधियां शोधपत्रप्रकाशनेन नितरां गौरवमनु-भवति। हिन्दीसंस्कृताङ्ग्लभाषागुणमयीयं खलु **'संस्कृतवाङ्मयी'** त्यनुसन्धानपत्रिका वेददर्शनसाहित्यपालिधर्मशास्त्रवास्तुशास्त्रज्योतिर्वैज्ञानिकचिकित्साशास्त्रादि-विविधविषयभाजनत्वेन विद्योततेतराम्। हिन्दीसंस्कृताङ्ग्लभाषाभिश्चालङ्कृताः खलु सर्वे लेखाः शोधपत्राणि वा शोधप्रौढिचातुरीसमलङ्कृता विद्वज्जनादृता भवितुमर्हन्ति। अनुसन्धानपत्रिकायाः प्रारम्भिकेऽस्मिन् अङ्के त्रिभाषिकाः सप्तदशलेखाः शोधपत्राणि वा समपादिषत। अष्टसङ्ख्यापरिमितानि यानि शोधपत्राणि संस्कृतभाषामाध्यमेन पत्रिकामिमामलङ्कुर्वन्ति तेषु **'श्रीपाञ्चरात्रा-गमदर्शननिष्णातशेमुषीको विपश्चिन्मनीषीगुरुवर्यः'** इत्याख्योऽप्रतिमो गुरुसपर्यासमर्पितो लेखोऽप्रतिमविद्वांसं विशिष्टाद्वैतशेमुषीकमृषिकल्पं सम्पूर्णानन्दविश्वविद्यालयस्य यशस्विनं कुलपतिचरं गुरुदेवं संस्तौति। प्रथमलेखत्वेनेमं लेखं प्रणीय पत्रिकाया अस्याः सम्पादकेन लखनऊविश्वविद्यालयीय-

संस्कृतप्राकृतभाषाविभागाध्यक्षेन **प्रो. बृजेशकुमारशुक्लेन** मन्येऽहं मङ्गलाशंसनमकारि। रायबरेलीजनपदस्थे वैशवारामहाविद्यालयेऽध्यापनकर्मणि व्यापृता **डॉ. गायत्रीशुक्ला 'कुमारिलमतेऽर्थापत्तिप्रमाणम्'** इति सञ्ज्ञकं शोधपत्रं प्रस्तूय पत्रिकाया द्वितीये लेखे मीमांसाभिमतमर्थापत्तिप्रमाणं सुष्ठुतया निष्पादितवती। **डॉ. जी.शङ्करनारायणकृते 'धर्मशास्त्रवाङ्मये दुर्गविधानम्'** इत्याख्ये शोधपत्रे दुर्गविधानस्य धर्मशास्त्रीयं महत्त्वं स्वरूपञ्चोररीकृतम्। **'वेदानामीश्वरकर्तृत्वेऽ-पौरुषेयत्वविमर्शः'** इत्याख्ये वेदविषयके शोधपत्रे लखनऊ-विश्वविद्यालयस्य संस्कृतप्राध्यापकेन **डॉ. प्रयागनारायणमिश्रेण** वेदानामपौरुषेयत्वमान्वीक्षिकधिया नूतनतयाऽवोचि। संस्कृतभाषाप्रणीतेऽपरे शोधपत्रे संस्कृतविभागस्योपाचार्येण **डॉ. रामसुमेरयादवेन 'काव्येषु मुक्तकं श्रेयः'** इतिविषयमधिकृत्य संस्कृतवाङ्मये मुक्तककाव्यानां वैभवमुररीकृतम्। संस्कृतप्राकृतभाषाविभागीये समुत्कर्षकेन्द्रे शोधसहायकरूपेणाऽनुसन्धानधियोपकृतवतो **डॉ. सरोजकुमारशुक्लस्य 'पारस्करगृह्यसूत्रे कन्यायाः सुमङ्गलीत्वनिर्धारणम्'** इत्याख्ये शोधपत्रे कन्यायाः सुमङ्गलीत्वं सुष्ठुतया विचारितम्। अधिगतराष्ट्रपतिपुरस्कारवर्येण मध्यप्रदेशस्य जबलपुरे राराज्यमाणेनाऽऽचार्यप्रवरेण **प्रो. रहसविहारीद्विवेदि**महाभागेन मौलिकचिन्तनप्रसवेन प्रणीतो लेखो**ऽथशोधाधिकारी'** न केवलमद्यतनीनमनु-सन्धानप्रविधिमनुसन्धानप्रक्रियां वा परिभाषतेऽपितु व्यङ्ग्यात्मकशैलीमधिकृत्य शोधाधिकारिणां वास्तविकं चित्रमुत्किरति। एतेषामेव विद्वद्वर्याणां काव्यप्रणयनमेकं **'प्राज्ञपरिषद्'**-नाम्नाऽपि पत्रिकामिमामलङ्करोति। इत्थं संस्कृतभाषामाश्रित्य प्रणीतेष्वष्टसङ्ख्यकेषु शोधपत्रेषु पृथक्-पृथग् विषयाः शोधदृष्टिमुन्मीलयन्ति।

हिन्दीभाषामधिकृत्य प्रणीतशोधपत्रनिचये**ऽभिराजराजेन्द्रमिश्रैः** कुलपतिचरैः स्वकीयेन महार्घप्रणयनेन **संस्कृतवाङ्मयीयं** महत्सौभाग्यमनुभवति। **'मुक्तक संस्कृत काव्यों में कवि समय'** इति विषये चिन्तनमन्दाकिनीं प्रवाहयति विद्वच्छिरोमौलिः **प्रो. राजेन्द्रमिश्रो** बहुभिर्मुक्तककाव्यबन्धदृष्टान्तैः।। बौद्धदर्शनमधिकृत्य **'श्रीलङ्का में बौद्ध परम्परा का विकास'** इति सञ्ज्ञकं शोधपत्रं न केवलं श्रीलङ्कायां बौद्धसाहित्यशेवधिमुद्घाटयत्यपितु लखनऊविश्वविद्यालयस्यो-

पाचार्यवर्यायाः **डॉ. अरुणाशुक्लाया** बौद्धदर्शनज्ञानपरम्परां प्रख्यापयति। **'मृच्छकटिकम् में शासनव्यवस्था'** इति विषयमाश्रित्य विभागीयाया विषयविशेषज्ञाया **डॉ. शालिनीमिश्रायाः** शोधपत्रं तत्कालीनं शासनव्यवस्थां सुष्ठु निरूपयति। विभागीयाऽध्यापकस्य **डॉ. अभिमन्युसिंहस्य 'रामराज्य एक आदर्श और वास्तविकता'** सञ्ज्ञकं शोधपत्रं रामायणे प्रतिविम्बितं रामराज्यस्यादर्शस्वरूपमभिव्यनक्ति। गुवाहाटी-असम-प्रदेशेऽधिगतख्यातिर्विद्वन्मौलिः **प्रो. हेमुमहेशराठौङ्** महाभागो **'युक्तिकल्पतरुग्रन्थानुसार वास्तुविमर्शाऽऽख्यं** शोधपत्रं प्रस्तूय भोजराजस्य वास्तुविज्ञानं विशदतया प्रख्यापितवान्। **'वेदान्त-विलास'-दार्शनिकनाट्यपरम्परा में अनूठा प्रयोग'** इति विषयमधिकृत्य प्रणीते दार्शनिकेऽथ च साहित्यिके काव्यशास्त्रीये शोधपत्रे कर्णपुरीया विदुषी **डॉ. सुधागुप्ता** स्वकीयं मौलिकं चिन्तनं प्रस्तूय वेदान्तविलासवैभवं चित्रितवती।

संस्कृतवाङ्मयीत्याख्यायामेतस्यामनुसन्धानपत्रिकायां त्रयो लेखास्त्रीणि शोधपत्राणि वाऽऽङ्ग्लभाषायां स्वकीयान् विषयान् प्रतिपादयन्ति। **'अहिंसा इन् द मनुस्मृति-इट्स माडर्न पर्सपेक्टिव'** इति आङ्ग्लभाषानिबद्धे **डॉ. हिरनशर्मणः** शोधपत्रे मनुस्मृतिमधिकृत्याऽहिंसायाः स्वरूपविमर्शपूर्वकमाधुनिकपरिप्रेक्ष्येऽस्या माहात्म्यं नितरामुररीकृतम्। **डॉ. दामोदरन् पी.एम्.** इत्याख्यो विद्वान् स्वकीये **'थेरेप्यूटिक इम्प्लीकेशन्स इन् भरताज़ नाट्यशास्त्र फार बाडी परफेक्शन आफ ऐक्टर्स'** इत्याख्ये नाट्यशास्त्रीयेऽथ च चिकित्साशास्त्रीयेऽनुसन्धानपत्रे अभिनेतृणां कायिकेऽभिनये बहून् चिकित्साशास्त्रीयान् स्वास्थ्यविज्ञानपरान् च सिद्धान्तान् स्वधिया प्रकाशितवान्।। **डॉ. सुदेवकृष्णशर्मन्** जी-प्रणीतेऽन्तिमे ज्योतिर्वैज्ञानिके शोधपत्रे **'डिकैनेट्स आफ हिन्दू ऐस्ट्रोलोजी'** इति विषये भारतीय-ज्योतिषशास्त्रस्य विविधा दाक्षिणात्यपक्षा विमृष्टा जाताः।

वार्षिकाऽनुसन्धानपत्रिकाया अस्याः प्रकाशने यैर्विद्वद्वरेण्यैर्महार्घाणि शोधपत्राणि प्रत्तानि ते सर्व एव विद्वांसो धन्यवादपदवीमर्हन्ति। प्राज्ञपरिषद्रूपेण परामर्शदातृसमितिसादस्यमङ्गीकृत्य यैर्विश्वगौरवास्पदैर्विद्वद्वरेण्यैः महदनुग्रहः कृतस्तेभ्यः पञ्चमहापुरुषेभ्यः सम्पादकः सादरं कार्तज्ञ्यं निर्वहति। विश्वविद्यालयस्य

कुलाधिपतिवर्यैर्महामहिमराज्यपालमहोदयैः स्वकीयैराशीर्वादामृतवचोभिः पत्रिकेयं सनाथीकृता, एतदर्थं ते हार्दिकं कार्तज्ञ्यमर्हन्ति। भारतीयदर्शनशास्त्रनिष्णातो वैज्ञानिकप्रवरो लखनऊ-विश्वविद्यालयस्य कुलपतिपदेऽभिषिक्तः **प्रो. मनोजकुमारमिश्र**महाभागः संरक्षकत्वेन यत् स्वकीयैराशीर्वचोभिः शोधपत्रिकामिमालङ्कृतवान् तदर्थं तत्रभवान् सादरं धन्यवादपदवीं गच्छति। अन्येऽपि ये कुलपतिचराः विद्वांस इतरे च मनीषिणः पत्रिकायां प्रकाशनायाऽमृतसन्देशान् प्रेषितवन्तस्तेऽपि सर्वे धन्यवादपदमुपगच्छन्ति।। सम्पादकमण्डलस्य यैर्विभागीयैः सदस्यैः साहाय्यमाचरितं ते सर्वेऽपि धन्यवादार्हास्तान् सर्वान् प्रति कार्तज्ञ्यं प्रकटयन् मनो मे मोदतेतराम्। अन्येऽपि च ये प्रत्यक्षाप्रत्यक्षरूपेणास्याः पत्रिकायाः प्रकाशने सम्पादने स्वरूपावाप्तौ च यत्किञ्चित् साहाय्यमचरितवन्तस्ते सर्वेऽपि धन्यवादतामवतरन्ति। प्रकाशनकर्मण्यपि यैर्महानुभावैः साहाय्यं प्रत्तं तेषां समेषामपि कार्तज्ञ्यं विभागोऽयं हृदयेनावहति।

इत्थं हिन्दीसंस्कृताङ्ग्लभाषान्वितानि सप्तदशशोधपत्राणि **'संस्कृतवाङ्मयी'** त्याख्याया अनुसन्धानपत्रिकायाः प्रथमेऽस्मिन् अङ्केऽनुस्यूतानि वर्तन्ते। **'सप्तदशो वै प्रजापतिः'** इति मत्वा प्राजापत्यमिमङ्कं विदुषां गवेषकाणाञ्च समक्षमुपस्थापयतो नितरां प्रमोदते नो हृदयम्। आशास्यते यत् पत्रिकाया अयमङ्को विदुषां हस्ताम्बुजेषु समागत्य स्वीयं वैशिष्ट्यं स्वयमेव प्रख्यापयिष्यति। अनुसन्धानपत्रिकयाऽनया चेद् विद्वद्हृद् आह्लादितोऽभविष्यत्तर्हि विभागोऽयं भूम्ना कृतकृत्यतामगमिष्यत्। पत्रिकायां मुद्रणसम्बद्धा अशुद्धयोऽपराश्च त्रुटयो वा कुत्रचिच्चेद् दरीदृश्यन्ते तर्हि **'हसन्ति दुर्जनास्तत्र समादधति सज्जनाः'** इति सूक्तिमनुसृत्य विद्वद्भिस्तास्त्रुटयः सुष्ठु परिमार्जनीयाः सूचना दातव्याऽथवा येन भाविपरिमार्जनं भवेदिति। एवमस्याः पत्रिकायाः प्रसवाङ्कुसुममिदं विपश्चितां कररुहेभ्यः समर्प्य सम्पादकः स्वात्मानं कृतकृत्यं मन्वानो नितरां प्रमोदमुपगच्छति।।

◆◆◆

विषयाऽनुक्रमणिका

श्रीपाञ्चरात्रागमदर्शननिष्णातशेमुषीको विपश्चिन्मनीषी गुरुवर्यः

प्रो. बृजेशकुमारशुक्लः
आचार्योऽध्यक्षश्च, संस्कृतविभागे,
लखनऊविश्वविद्यालये, लखनऊ

अखिललोकललामभूतायां भगवतो विश्वेश्वरस्य पुर्यां काश्यां सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कौलपत्याधिभारं श्रीवैष्णवागमविशारदो वशीकृतशारदो विद्वद्धौरेयः श्रीरामानुजदर्शनाऽलङ्कृत-शेमुषीको देववाण्या विलसन्मुखेन्दुप्रतिभः सहृदयकोविदपुंस्कोकिलः तत्रभवान् श्रीगुरुवर्यः प्रो. अशोककुमारकालियामहोदयस्तथैव सुष्ठु विभर्त्ति स्म यथा भगवान् भूतभावनो विश्वनाथः काशीं धारयामास। तत्रभवतः कालियावर्यस्य चरणारविन्दयोर्मम धन्यानि तानि रमणीयानि क्षणानि लक्ष्मणपुरे समतीतानि द्वाविंशतिवर्षाणि, येषु न केवलं मयि विविधविद्याकमलानि विकसितानि, अपितु **'विद्या ददाति विनय'** मिति सूक्तिमपि तद्व्यक्तित्वे साकारतया दर्शं दर्शं स्वजीवनेऽप्यहं तामाचरितुं नितरां कामये। एतत्खलु गुरोर्गुरुव्यक्तित्वस्य प्रभावो येन गुरुवर्याणां सुचरितान्युपास्यानि भवन्ति। सारस्वतविप्रान्वयप्रसूतस्य तत्रभवतः पूज्यस्य कालियामहोदयस्य सारस्वतीं प्रतिभां चेद् वर्णयामि, मन्ये सरस्वत्यपि नेर्ष्याकलुषायिता स्याद् अपि चैष सरस्वत्या दधीच इति तर्कयामि तर्हि तद्वर्णनमाधुरीं कश्चिदपरो बाणभट्ट एवाऽऽख्यातुं प्रभवति। अहं तु केवलं विल्हणमुखेन श्रीगुरुप्रातिभसुषमामवलोकयितुं पारयामि, ममाऽकिञ्चनस्य तद्वैदुष्यवर्णनक्षमस्य शब्दस्याऽभावात् -

जयन्ति ते पञ्चमनादमित्र-

चित्रोक्तिसन्दर्भविभूषणेषु।

सरस्वती यदवदनारविन्दे-
ष्वाभाति वीणामिव वादयन्ती।[1]

निश्चप्रचमेव सरस्वती गुरुवर्यस्य श्रीकालियाधीमतो मुखारविन्दे स्वकीयां कच्छपीं वादयन्तीवाऽवतिष्ठते। यतो हि न केवलमेष विशिष्टाद्वैतदर्शने निष्णातोऽपितु व्याकरणेऽपि सुस्नातः, काव्यशास्त्रसरोवरेऽवगाहितः, साहित्यसमुद्रपारङ्गतः, अद्वैतवेदान्तेऽद्वैतः, मीमांसाम्बुधिसुमग्नः, तर्कनौर्नैयायिकः, कविताकामिनीविरचनप्रसाधकः श्रीवैष्णवागमरहस्यसाधकः अन्यासु विद्यासु च नवनवोन्मेषशालिनीप्रतिभाविधायकश्चाऽसौ विद्वद्वरेण्यो दरीदृश्यते। तत्रभवतः श्रीगुरोर्विषयेऽहमिदानीं लेखनीचालनं न केवलं धन्यं पूततमं मन्येऽपितु तानि क्षणानि किल धन्यानि पवित्रतमत्वेन प्रतिष्ठितानि स्युर्येषु गुरूदन्तमेतद् विलिखामि।

एकोनविंशतितमशताब्द्या उत्तरार्द्धे प्रायः पञ्चविंशत्युत्तरशताब्दपूर्वे **कर्पूरस्थला** राज्यस्य नरपतेरामन्त्रणेन प्रेरणया चैकः सारस्वतब्राह्मणवंशीयो ब्रह्मचारी सिद्धयोगी च कश्चिद् गेंदारामोऽभिधानो महात्मा तीर्थयात्रापरोऽयं पञ्जाबतो वाराणसीमागत्य पुनश्च बहराइचजनपदे 'बौण्डी' नाम ग्राममाजगाम। तेन महात्मना कर्पूरस्थलाराज्यस्य राज्ञ आदेशानुसारं तत्र मन्दिरमेकं निरमायि। एतस्य पूज्यस्य सिद्धयोगिनश्चमत्कारं वीक्ष्य राजा महात्मने तत्सम्बन्धिनां कृते चाऽऽवासभूमिं प्रदायाऽन्याः सुविधाः प्रायच्छत्। शनैःशनैः महात्मनो गेंदारामस्य सम्बन्धिनः परिवारिजनाश्च तत्राऽऽगत्य निवासं चक्रुः। तेषु महात्मनो भ्रातृजः पण्डितो गौरीशङ्करकालियाऽप्यासीत्। तत्र भवतः पण्डितस्य गौरीशङ्करकालिया-महोदयस्य पुत्रः पण्डितो गिरिधारीलालकालिया बभूव। गुरुवर्यः प्रो. अशोककुमारकालियामहोदयः पण्डितस्य श्रीगिरिधारीलालकालियाख्यस्य द्वितीयपुत्रत्वेनोत्तरप्रदेशराज्यस्य बहराइचजनपद-स्थिते **'बौण्डी'** ग्रामेऽप्रैलमासस्य २० तारिकायां १९४४ खिस्ताब्दे जन्म लेभे। अस्य मातुर्नाम श्रीमती सुभद्रादेवीकालियाऽऽसीत्। धार्मिकसात्त्विकसंस्कारैः संस्कृते परिवारेऽवतीर्णत्वात्पूज्यः कालियामहोदयोऽपि हृदयेन सात्त्विकसंस्कारान् बभार। स यथा विद्यावान्

---
१. विक्रमाङ्कदेवचरिते १/१०

तथैव विनयी सञ्जातः, यथा प्रज्ञावान् तथैव दृढनिश्चयी बभूव, यथा रमणीयवपुष्मान् तथैव सहृदयोऽभूत्, यथा गुणवान् तथैव दर्परहितोऽभवत्, यथा सुशीलस्तथैव च मात्सर्यादिदोषहीनोऽवर्तत।

प्रारम्भिकीं शिक्षामारभ्य मिडिलकक्षां यावच्छ्रीकालियामहोदयो **बौण्डी** ग्राम एव शिक्षां प्राप्य माध्यमिकीं शिक्षामचीकमत। एतदर्थं तेन बहराइचजनपदस्य **इकौना** नामधेय उपनगरे जगज्जीत-इण्टरकालेजाख्यायां संस्थायामध्ययनमकारि। ततः कालियामहोदयः १९५७ खिस्ताब्दे हाईस्कूलपरीक्षां १९५९ खिष्ट्राब्दे च इण्टरमीडिएटपरीक्षां समुत्तीर्णवान्। ततश्चोच्चशिक्षाप्राप्त्यै स लखनऊविश्वविद्यालये प्रविष्टः। प्रो. कालिया १९६२ खिष्ट्राब्दे बी.ए. (आनर्स) परीक्षामुत्तीर्य प्रथमश्रेण्यां पुनश्च संस्कृतविषये एम.ए. परीक्षां १९६३ खिस्ताब्दे प्रथमश्रेण्यामेव दर्शनवैशिष्ट्येन समुत्तीर्णवान्। एम.ए. कक्षायामध्ययनं कुर्वन्नेव कालिया-महोदयस्तत्कालीनैर्लक्ष्मणपुरविश्वविद्यालयस्य संस्कृतप्राकृतभाषाविभागाध्य-क्षैर्निष्णातविशिष्टाद्वैतदर्शनविशिष्टशेमुषीकैः प्रो. सत्यव्रतसिंहवर्यैः प्रभावितः सन् विशिष्टाद्वैतदर्शने शोधकार्यं चिकीर्षुरयं शोधोपाध्यर्थं लखनऊविश्वविद्यालय एव प्रो. सिंहस्य निर्देशने पञ्जीकरणं व्यधात्। प्रो. सत्यव्रतसिंहवर्यैः प्रेरित आदिष्टश्चायं विशिष्टाद्वैतदर्शनस्य विशिष्टाध्ययनाय १९६३ खिस्ताब्द एव मैसूरनगरं जगाम। तत्र मैसूरनगरे विशिष्टाद्वैतदर्शनस्य श्रीवैष्णवसम्प्रदायस्य च केन्द्रभूते श्री ब्रह्मतन्त्रपरकालमठाश्रमो वर्तते। अस्य मठस्य स्थापना चतुर्दशशताब्द्यां विशिष्टाद्वैतदर्शन-श्रीवैष्णवसम्प्रदायधर्मयोः प्रख्याताचार्यस्य कवितार्किकसिंहस्य भगवद्घण्टावतारस्य श्रीवेङ्कटनाथवेदान्तदेशिकस्य प्रियशिष्येण श्रीब्रह्मतन्त्रस्वामिनाऽकारि। अस्यैव सुप्रसिद्धस्य मठस्य त्रयस्त्रिंशत्तमः पीठाधीश्वरः श्रीलक्ष्मीहयग्रीवदिव्यपादुकासेवापरो विशिष्टाद्वैतदर्शनस्य साक्षादिव श्रीरामानुजः श्रीवैष्णवधर्मपरम्परासु निष्णातप्रज्ञः, सिद्धमन्त्रः श्रीमदभिनवरङ्गनाथ-परकालस्वामिपादो राराज्यते स्म। तत्र भवता श्रीलक्ष्मीहयग्रीवदिव्यपादुकाप्रपन्नेन श्रीमदभिनवरङ्गनाथपरकालस्वामिना स्वोत्तरप्रदेशयात्रां कुर्वता लखनऊनगरमागत्य तत्रोदीच्यान् छात्रान् विशिष्टाद्वैतदर्शनमध्यापनीयमिति स्वकीयोऽभिलाषो पूर्वमेव

प्रकटित आसीत्। एतां तदाकाङ्क्षां सफलीकर्तुमिव डॉ. कालियामहोदयस्तन्मठ-मासाद्य तप्तशङ्खचक्राङ्कनरूपां श्रीवैष्णवीं दीक्षां गृहीत्वा श्रीमदभिनवरङ्गनाथ-परकालस्वामिपादपङ्केरुहयोः सविधे श्रवणमनननिदिध्यासनरूपं श्रीरामानुजाचार्यपादैः प्रणीतं श्रीभाष्यं विशिष्टाद्वैतदर्शनरहस्यञ्चाऽधीतवान्। अब्दद्वयं यावच्छ्रीकालिया-महोदयस्तत्र श्रीस्वामिपादपङ्कजमकरन्दरसं निपीय १९६५ खिष्ट्राब्दे लखनऊनगरं प्रत्यावर्तत। एतदतिरिक्तं श्रीब्रह्मतन्त्रपरकालमठेऽनेके संस्कृतविद्वांस आचार्याः पाञ्चरात्रागमरहस्यबोद्धारश्चाऽऽसन्। प्रो. कालियामहोदयेन तत्र श्रीआत्मकुरू--दीक्षाचार्य, श्री के. एस. वरदाचार्य- श्री ई.एस. वरदाचार्य-प्रभृतिभ्यो विद्वद्भ्यो विशिष्टाद्वैताऽद्वैतन्यायव्याकरण-साहित्यालङ्कारमीमांसावेदोपनिषदां रहस्यं सम्यक्तयाऽलम्भि।

गीर्वाणवाणीवाङ्मये विशिष्टोपलब्धिमधिगम्य प्रो. कालियामहोदयो लक्ष्मणपुरमासाद्य पी-एच्.डी. उपाध्यर्थं शोधकार्यं चकार। स 'लक्ष्मीतन्त्र-धर्म तथा दर्शन' इति विषयमधिकृत्य स्वकीयं गहनं शोधकार्यं प्रस्तुतवान् । अस्य शोधप्रबन्धस्योपरि स १९६८ खिष्ट्राब्दे पी-एच्.डी. शोधोपाधिना विभूषितोऽभूत्। एतस्मिन्नेव वर्षेऽस्य विशिष्टां विद्याज्ञानसुमतिसमलङ्कृतां मेधां वीक्ष्याऽधिकारिभिर्लखनऊविश्वविद्यालयस्य संस्कृतप्राकृतभाषाविभागेऽ--स्थायिप्रवक्तृरूपेण श्रीकालियामहोदयस्य नियुक्तिर्व्यधायि। ततोऽस्मिन्नेव विश्वविद्यालयेऽध्यापनं कुर्वन् डॉ. कालियामहोदयः १९८४ खिस्ताब्द उपाचार्यपदवीं प्राप्तवान्। तत्पश्चात् तत्रभवान् १९९८ खिस्ताब्द आचार्य (प्रोफेसर) पदं विभूषितवान्। सितम्बरमासे २००० खिस्ताब्दे प्रो. कालियामहोदयः लखनऊ-विश्वविद्यालयस्य संस्कृतप्राकृतभाषाविभागेऽध्यक्षपदं बभार। ततः २००५ खिस्ताब्दस्य जूनमासस्य ७ तारिकां यावत्स संस्कृतविभागाध्यक्षपदमलङ्कुर्वन्नेव जूनमासस्य ८ तारिकायां २००५ खिस्ताब्दे वाराणसेय-सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिपदम्भूषयाञ्चकार। ततः प्रो. कालियामहोदयो वाराणस्यां कौलपत्यं सुष्ठु सम्पादयन् सम्पूर्णानन्दसंस्कृतविश्वविद्यालये संस्कृतभाषायाः संस्कृतनिबद्धशास्त्रवाङ्मयस्य च श्रीवृद्धिं कुर्वन् कारयंश्च तत्समृद्धये नवीना

योजना उपपादयन् विश्वनाथ इव काशीमलञ्चकार। इदानीमस्य परिवारे साध्वी पत्नी श्रीमती सन्तोषलक्ष्मीकालियाऽशुंलप्रत्यूषाख्यौ द्वौ सुशीलौ पुत्रौ पायलाख्या च ज्येष्ठा पुत्रवधूः शोभन्तेतराम्।

प्रो. अशोककुमारकालियामहोदयः प्रारम्भत एव संस्कृतसेवापरो वर्तते। तत्रभवताऽवैतनिक-सेवामाध्यमेनाऽनेकसंस्थासु संस्कृतसेवाऽकारि। भारतवर्षे **सुप्रसिद्धाऽखिलभारतीयसंस्कृतपरिषद्**, लखनऊ-नगरे वर्तते। प्रायश्चत्वारिंशद्वर्षेभ्यः प्रो. कालियामहोदयोऽस्यां संस्थायां स्वकीयां सेवां प्रयच्छति। अस्याः संस्थायाः **अजस्रा** नाम्नी संस्कृतस्य त्रैमासिकीं पत्रिकां प्रो. कालियामहोदय एव सम्पादयति। अस्या अखिलभारतीयसंस्कृतपरिषदः प्रथममपरमन्त्रिपदं ततश्च मन्त्रिपदमिदानी ञ्चोपाध्यक्षपदं सोऽलङ्करुते। प्रो. कालियामहोदयो नैमिषारण्यस्थस्य **पौराणिक तथा वैदिक अध्ययन एवम् अनुसन्धान संस्था**नाभिधानस्य निदेशकपदे स्थित्वा स्वीयां समुत्कृष्टां सेवां प्रददाति। एवं प्रो. कालियामहोदयः सततं संस्कृतवाङ्मयस्य प्रचार-प्रसारसेवां विदधानः समुच्चपदवीङ्गतोऽपि नितरां विनयशीलोऽहङ्काररहितो नियमानुकूलकर्त्तव्यतापरायणो साक्षादिव नारायणो देववाणीसमुन्नायकः सहजप्रकृतिः सच्चरित्रश्चाऽवतिष्ठते।

प्रो. अशोककुमारकालियामहोदयस्य विशिष्टाद्वैतदर्शनेऽस्ति कश्चित् समर्पणभावः। श्रीवैष्णवधर्मे विशिष्टाद्वैतदर्शने-चाऽध्ययनमध्यापनञ्चाऽयं कुर्वन् सुदीर्घां सारस्वतसाधनामनुसन्धानधिया सम्प्रत्यपि विदधाति। **पुरुषोत्तमसंहितायाः सम्पादने परिशीलने** चाऽयं २००४ खिस्ताब्दे 'डी.लिट्' इत्युपाधिना समलङ्कृतो जातः। उत्तरभारते किलोच्चविद्याक्षेत्रे प्रो. कालिया निश्चप्रचमेवैकलो विद्वान् वर्तते येन श्रीवैष्णवपाञ्चरात्रागमस्य विशिष्टाद्वैतदर्शनस्य च जैत्रध्वजा दृढतयोच्चैर्व्यधायि। अयं महानुभाव उत्तरप्रदेशसंस्कृतसंस्थानतः संस्कृत-साहित्यपुरस्कारेणाथ चाऽनेकाभिः संस्थाभिश्च विविधपुरस्कारैः सह राष्ट्रपतिपुरस्कारेणाऽपि सम्मानितोऽभूत्।

प्रो. कालियामहोदयस्य कर्तृत्वम्

प्रो. अशोककुमारकालियामहोदयस्य यादृशं व्यक्तित्वं तादृशमेव कर्तृत्वं वरीवर्तते। अखिलभारतीयसंस्कृतपरिषदस्त्रैमासिकसंस्कृतपत्रिकाया **'अजस्रा'**ख्यायाः सुष्ठु सम्पादनं बहुवर्षेभ्योऽयं करोति। एतदतिरिक्तं लक्ष्मणपुर-विश्वविद्यालयस्य संस्कृतप्राकृतभाषाविभागतः प्राकाश्यमुपनीयमानाया **'वाङ्मयी**त्यभिधानाया वार्षिकशोधपत्रिकायाः प्रधानसम्पादकत्वमपि तत्रभवताऽधारि। प्रो. कालियामहोदयानां कौलपत्ये सम्पूर्णानन्दसंस्कृत-विश्वविद्यालये यानि प्रकाशनानि भवन्ति स्म तेषु सर्वेषु क्वचित्प्रधानसम्पादकरूपेण क्वचिच्च भूमिकालेखकत्वेन तत्रभवतो डॉ. कालियामहोदयस्याऽवदानं दरीदृश्यत एव। प्रो. कालियामहोदयस्य सप्तग्रन्थप्रसूनानि सम्प्रति प्रकाशितानि वर्तन्ते। एतेषां नामानि वर्ण्यविषयेण साकं समासेनाऽत्र प्रस्तूयन्ते-

१. लक्ष्मी तन्त्र-धर्म और दर्शन

ग्रन्थोऽयं प्रो. कालियामहोदयेन पी-एच्.डी. शोधोपाध्यर्थं शोधप्रबन्धत्वेन व्यलेखि। अस्मिन् हिन्दीभाषयाः पाञ्चरात्रतन्त्रागमरहस्यभूतस्य लक्ष्मीतन्त्रस्य धार्मिकं दार्शनिकञ्च विवेचनं सुष्ठु विहितम्। ग्रन्थस्याऽस्योत्कृष्टतां दृष्ट्वाऽखिलभारतीयसंस्कृतपरिषदा लखनऊतः प्रकाशनमेतस्य व्यधायि। विशिष्टाद्वैतदर्शनस्य पाञ्चरात्रागमस्य च ज्ञानायैषः परमोपयोगीग्रन्थोऽङ्गीक्रियते विपश्चिद्वर्यैः।

२. आचार्यपञ्चाशत्

श्रीवैष्णवाचार्येण वेङ्कटाध्वरिणा विरचितोऽयं ग्रन्थः पाण्डुलिपिरूपत्वेनाऽवतिष्ठते स्म। प्रो. कालियामहोदयेनैतस्य मातृका आसाद्य पाठालोचनपुरस्सरं सम्पादनं कृतम्। न केवलमेष ग्रन्थः समपादि तेनाऽपितु ग्रन्थस्याऽस्याऽऽङ्गल-भाषयाऽनुवादोऽपि विहितः। ग्रन्थोऽयं लखनऊस्थयाऽखिलभारतीयसंस्कृतपरिषदा प्राकाशि।

३. सुधाभोजनम्

सुधाभोजनं नृत्यनाटिकारूपत्वेन रचितमेकं रूपकमस्ति। अस्य कथावस्तु बौद्धजातकग्रन्थाद् ग्रहीतम्। शक्रस्य चतस्रः कन्या अत्र वर्णिता। एताः श्रीश्रद्धाऽऽशाह्रीनामधेयाः शक्रकन्यकाः सुधां लब्धुं महर्षेः कौशिकस्य पार्श्वे जग्मुः। एतासां गुणधर्मान् निरीक्ष्य कौशिकः सुधापानाय 'ह्री' नाम्नीं कन्यामेव वरयाञ्चकार, तस्यै चाऽमृतं प्रददौ-

सा त्वं मया साकमिहाऽऽश्रमे वरे।
आमन्त्रिता काञ्चनवेल्लिविग्रहे।।
पूज्याऽसि भद्रे मधुरै रसोत्तमै-
स्त्वां पूजयित्वैव सुधामहं लभे।।[1]

अत्र कालियामहोदयस्य कविहृदयत्वं प्रकाशितं भवति। यद्यपि सर्वाः कन्या गुणयुक्ता आसन्, केन कारणेन 'ह्री' नाम्नी कन्यैव सुधायै पात्रीकृता महर्षिणा। एतस्य चित्रणं नामानुसारं तत्रभवता कालियामहोदयेन विहितम् -

आढ्या नु मां श्रीः प्रतिभाति मातले।
श्रद्धा त्वनित्या शृणु देव सारथे।।
आशा विसंवादितया मता हि मे।
ह्रीरेव चाऽऽर्या प्रगुणे प्रतिष्ठिता।।[2]

प्रो. कालियामहोदयस्य रसोऽलङ्कारमाधुरी गीतेषु व्यज्यतेतराम् । सुधाभोजन एवैकस्मिन् गीते यन्माधुर्यं यच्चाऽलङ्कारप्रयोगजातं तेनाऽवर्णिषाताम्, तत्तु तत्रभवतः काव्यशास्त्रीयं ज्ञानं प्रामाण्यपदवीमवतारयति-

हंसशिञ्जिते लहरिवर्तने
कीचकतानसमीरे।

---

१. सुधाभोजने- २/३७

२. तत्रैव- २/३९

अलिकुलकलकलकलिते गीते
सङ्गीतकवति तीरे।
पुलकितजघनपुलिनबहुचपले
सरसे सरसि सुकूले
उरसिज सरसिजसज्जितसलिले
भ्रमरकुले ह्यनुकूले।।[1]

अत्र नादसौन्दर्यं सङ्गीतशास्त्रानुरूपमभिन्यस्तम्। निश्चयरूपेण एषः कविः कवितामाधुरीधुरीसंवाहक एव। डॉ. कालियामहोदयः श्रीवैष्णवसम्प्रदाये दीक्षितोऽत एव तद् हृदयं भगवता रङ्गनाथेनाऽनुरञ्जितं कवितास्वपि दरीदृश्यते। तत्र विशिष्टाद्वैतस्य चिदचिदीश्वररूपं तत्त्वत्रयमपि विलसतितराम् । सुधाभोजन-रूपकस्य नान्दीपाठोऽत्र द्रष्टव्यः-

धरति हृदि सदाम्बां यस्स्वशक्तिं नटीं तां
चिदचिदखिलनाट्यस्यादिमस्सूत्रधारः।
नटति सकललोको यस्य सङ्कल्पलेशाद्
विहरतु हृदि रङ्गे रङ्गनाथो यथेच्छम्।।[2]

अङ्कद्वयान्विते सुधाभोजने कविहृदयस्य प्रो. कालियामहोदयस्य कारयित्रीप्रतिभा सुतरां जरीजृम्भते। अस्य रूपकस्य प्रकाशनमपि लखनऊ-नगरस्थयाऽखिलभारतीयसंस्कृतपरिषदाऽकारि। रूपकस्याऽस्य मञ्चनं प्रसारणं चाऽभवल्लक्ष्मणपुरस्थाऽऽकाशवाणीतः। एतद् रूपकं लखनऊविश्वविद्यालयस्य संस्कृतस्नातककक्षायां पाठ्यक्रमरूपत्वेनापि बहुवर्षाणि यावदङ्गीकृतं तदध्ययनमण्डलसदस्यवर्यैः। सरलया संस्कृतभाषया रचितं गद्यपद्यान्वितं रूपकमेतदस्य कविवैदुष्यं विभूषयति।

४. तन्त्राधिकारि-निर्णयः

एष ग्रन्थो भट्टोजिदीक्षितेन व्यलेखि। प्रो. कालियामहोदयेनैतस्य ग्रन्थस्य

---

१. सुधाभोजन पूर्वाङ्के-गीतम्

२. सुधाभोजने- १/१

मातृकाः प्राप्य पाठालोचनपुरस्सरं विस्तृतभूमिकया च सार्द्धं ग्रन्थोऽयं समपादि। एतस्य प्रकाशनमप्यखिल-भारतीयसंस्कृतपरिषद्द्वारेण विहितम्। एतस्मिन् ग्रन्थे श्रीपाञ्चरात्रागमस्य सिद्धान्तानामाचाराणाञ्च खण्डनमुपलभ्यते।

५. प्रश्नोत्तरमणिरत्नमाला

एतल्लघु पुस्तकं भगवाञ्छङ्कराचार्यः प्रश्नोत्तरश्लोकत्वेन प्रणिनाय। एतस्य पुस्तकस्य सम्पादनं प्रो. कालियामहोदयेन विहितं विभिन्नमातृकाभ्यः सुष्ठु पाठं समालोच्य। अखिलभारतीयसंस्कृतपरिषदा लखनऊस्थया पुस्तकमेतत्प्राकाशि। वैराग्यविषयसमलङ्कृतमेतत्पुस्तकविषयवस्तु, यथा श्लोकेनैकेन द्रष्टुं शक्यम्-

अपारसंसारसमुद्रमध्ये
सम्मज्जतो मे शरणं किमस्ति?
गुरो! कृपालो! कृपया वदैतद्
विश्वेशपादाम्बुजदीर्घनौका।।[1]

६. पाञ्चरात्रपरिशीलन

पाञ्चरात्रपरिशीलन इत्याख्येऽस्मिन् ग्रन्थे पाञ्चरात्रागमसंहितासु वर्णितस्य पाञ्चरात्रविषयकधर्मदर्शनादितत्त्वस्य समालोचनात्मकं विवरणं हिन्दीभाषयाऽत्र समुपस्थापितं वर्तते। प्रो. कालियामहोदय एतद्ग्रन्थं लिखित्वा पाञ्चरात्रागमस्य विषयान् उत्तरभारते हिन्दीभाषामाध्यमेन प्रचारितवान्। 'न्यू भारतीय बुक कारपोरेशन' इत्याख्येन प्रकाशकेन दिल्लीतः प्रकाशितोऽयं ग्रन्थो विदुषां प्रशंसार्हतां लभते।

७. पुरुषोत्तमसंहिता

पाञ्चरात्रागमस्याऽनेकासु संहितास्वेका पुरुषोत्तमसंहिता वर्तते। अस्याः संहिताया एकैव मातृकाऽऽन्ध्रलिपौ प्राप्यते। अनया मातृकयाऽतिजीर्णतया पठितुमशक्ययाऽपि बहुपरिश्रमतया प्रो. कालियामहोदयेन पाठान् संशोध्यैषा

---
१. प्रश्नोत्तरमणिरत्नमालायां- श्लोकः-१

संहिता समपादि। 'भारतीय न्यू बुक कारपोरेशन' इत्याख्येन प्रकाशकेन दिल्लीतः प्रकाशितो ग्रन्थोऽयं पाञ्चरात्रागमसाहित्यस्य श्रीसंवर्धनं करोति। पुरुषोत्तमसंहितायाः सम्पादने परिशीलने च प्रो. कालियामहोदयो लखनऊ-विश्वविद्यालयस्य संस्कृतप्राकृतभाषाविभागतो डी.लिट्' इत्युपाधिनाऽलङ्कृतोऽभूत्।

एतदतिरिक्तं प्रो. कालियामहाभागस्याऽनेकानि शोधपत्राणि संस्कृत-कविताश्च विभिन्नपत्रपत्रिकासु समवलोक्यन्ते। इदानीमपि व्यस्तक्षणेषु तत्रभवतः कालियामहोदयस्य लेखनमध्यापनञ्च प्रचलति। व्याख्यानानि चैतस्यानेकाभिः संस्थाभिः समायोजितानि। सम्प्रति प्रो. कालियामहोदय उत्तरभारते विशिष्टा-द्वैतदर्शनस्य पाञ्चरात्रागमस्य चाऽप्रतिमो विद्वान् मन्यते विद्वद्वर्यैः। ईदृशस्य विदुषांवरेण्यस्य गुरुवर्यस्य प्रो. कालियामहाभागस्य चरणाम्बुजयोः पद्यप्रसूनसपर्यां समर्पयन्नहं स्वीयां लेखनीं धन्यामिव मन्वानो नितरां मोमुदीमि-

श्रीरामानुजदर्शनाम्बुधितरोऽद्वैते च पारङ्गतः।
मीमांसासुधियन्धयास्य सुधयाऽस्याप्लाविताः सद्धियः।।
येनाकारि च साङ्ख्यगौतमगिरा सार्द्धं सुकेलिर्मुदा।
वन्देऽहं तमशोककालियगुरुं श्रीकौलपत्यास्पदम्।।

कुमारिलमतेऽर्थापत्तिप्रमाणम्

डॉ. गायत्रीशुक्ला,
लालगञ्जम्, रायबरेली

अर्थस्यापत्तिः कल्पना यस्मात् तदर्थापत्तिः अर्थस्यापत्तिर्वा इति व्युत्पत्त्या सिद्धोऽर्थापत्तिरिति शब्दोऽर्थद्वयमावहति। अत्र प्रथमा व्युत्पत्तिः प्रमाणपरा द्वितीया च फलपरा। वस्तुतः प्रमितस्यार्थस्य अर्थान्तरेण विनाऽनुपपत्तिमालोच्य तस्योपपत्त्यर्थम् अर्थस्य यत् कल्पनं, सा अर्थापत्तिः यथोक्तं मानमेयोदये-

अन्यथानुपपत्त्या यदुपपादककल्पनम्।
तदर्थापत्तिरित्येवं लक्षणं भाष्यभाषितम् ।।[1]

शबरस्वामिनां मते पीनत्वादिना उपपाद्यस्यार्थस्य अन्यथोपपत्तिमूला या उपपादकस्य कल्पना भवति तदर्थापत्तिः। अत्र भाष्यकारेणोक्तम् 'दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इत्यर्थकल्पना'। अनेन वाक्यप्रमाणेन 'दृष्टः श्रुतो वा' इति वचनेन यदर्थकल्पना भवति सैवार्थापत्तिः प्रमाणम् इति भाष्ये कथितम्- एतद् भाट्टमीमांसकानां मतम् । वस्तुतो भाट्टमीमांसकैः अर्थापत्तेः द्वैविध्यं स्वीकृतम्। यथोक्तं श्लोकवार्तिके-

प्रमाणषट्कविज्ञातो यत्रार्थोऽन्यथा भवेत्।
अदृष्टं कल्पयेदन्यः सार्थापत्तिरुदाहृतः।[2]

अतएव कुमारिलमतेऽर्थापत्तिप्रमाणस्यापि द्वैविध्यं स्वीकृतम्; किंतु

---

१. मानमेयोदये, श्लोक-१२७

२. श्लोकवार्तिके अर्थापत्तिपरिच्छेदः, श्लोक-१

प्रभाकरमतेऽर्थापत्तिप्रमाणस्यैकविध्यमेव स्वीकृतम्। तेषां मते दृष्टार्थापत्तिरेव भवति; न तु श्रुतार्थापत्तिः। तेषां मते भाष्ये उक्तो 'दृष्टः श्रुतो वा' इत्यनेन वचनेन द्वैविध्यकथनं गोबलीवर्दन्यायेन उपलब्धिपरतया गमयितव्यम्।

अत्र योऽर्थो येन विना नोपपद्यते सोऽर्थः उपपाद्यः। यस्याभावे यस्यानुपपत्तिः स उपपादकः, यथा प्रमाणान्तरेण देवदत्तस्य जीवने निश्चिते सति गृहेऽनवस्थितस्य तस्य जीवतो बहिर्भावस्य कल्पनां विना जीवनम् अनुपपन्नं भवति। अतएव जीवनं बहिर्भावं यया कल्पयति साऽर्थापत्तिः। अत्रोपपाद्यं जीवनं करणम्। उपपादको बहिर्भावः तस्य फलम् । येन विना यद् अनुपपन्नं तज्जीवनम् उपपाद्यम्। अत्र च प्रमाणावगतो जीवनबहिर्भावयोः परस्परं प्रतिघातः करणम्। यतो हि गृहेऽवस्थितो देवदत्तो बहिर्वा इति केनचिद् प्रमाणेन ज्ञातम्, अन्येन प्रत्यक्षादिना प्रमाणेन गृहे नास्ति इति अवगतम् तदुभयसमुच्चितं परस्परप्रतिघाति प्रतीयते; सोऽयं प्रतिघातो बहिर्भावस्य कल्पनया समाधीयते। अतएव प्रमाणसिद्धयोर्द्वयोरर्थयोः परस्परं प्रतिघातो अर्थान्तरकल्पनया समाधेयत्वाद् अर्थापत्तेः कारणम् इति विचार्यमाणः। तत्समाधानार्थं च अर्थान्तरकल्पना भवति सैवार्थापत्तिः प्रमाणम् इति सिद्धम्।

अथवा यथा पीनो देवदत्तो दिवा न भुङ्क्ते इतिसाङ्ख्यशास्त्रोक्त उदाहरणे वर्णितं देवदत्तस्य पीनत्वम् अर्थान्तरकल्पनां विना असिद्धम्। यतोहि दिवा अभुञ्जाने सति पीनत्वमसम्भवम् अतः तस्य रात्रिभोजनमवकल्प्यते। वस्तुतो यस्य कल्पनीयस्य अर्थस्याभावे सत्युपपाद्यं नोपपद्यते; स कल्पनीयोऽथ उपपादकः। यथा अस्मिन्नेवोदाहरणे रात्रिभोजनम् उपपादको भवति। अत्र उपपाद्यज्ञानं करणत्वेन अर्थापत्तिः प्रमाणम्। उपपादकज्ञानञ्च अर्थापत्तेः फलम्। तदेव दिवावाक्यं न रात्रिवाक्यस्यानुमापकम्। एवं दिवादिपदार्थोऽपि नैव लिङ्गं सम्बन्धाभावात्। उक्तञ्च श्लोकवार्तिके-

पदार्थैरपि तद्वाक्यं नासम्बन्धात् प्रतीयते।।
सामान्यान्यथासिद्धेर्विशेषं गमयन्ति हि।।[1]

---

१. श्लोकवार्तिके श्लोकः ६०

यत्तु नैयायिका अस्या अर्थापत्तेः अनुमाने अन्तर्भावम् इच्छन्ति तदयुक्तम्; यतोहि अर्थापत्तौ अनुपपद्यमानस्य गम्यत्वम्, उपपादकस्य गमकत्वम् । अनुमितौ तु उपपादकस्यैव गम्यत्वम् अनुपपन्नस्य च गमकत्वम् । अतस्तयोरत्यन्तभेदः। अर्थापत्तिः अनुमानेनान्तर्भवति तत्रान्वयत्वाप्तिरग्रहणेन अन्वयिनि अन्तर्भावात् इति तात्पर्यम्। व्यतिरेकानुमानस्य पूर्वमेव निरस्तत्वात् नापि व्यतिरेकिणि व्याप्तिः सिध्यति। वस्तुतो यत्र यत्र धूमः तत्र तत्राग्निः इति व्याप्तिग्राहकप्रमाणेन अयमग्निः पर्वतेऽपि प्राप्तः। अथवा दृश्यमानो धूमः पर्वते स्वकारणमग्निमाक्षिपति। एवं विधिना व्याप्तिग्राहकप्रमाणेन धूमदर्शनेन पर्वते क्वचिदग्निरस्तीति ज्ञातम्। तस्य च ऊर्ध्वदेशे अनुपलम्भेन विरोधादधोदेशे अग्निः कल्प्यते इति अर्थापत्तिता आपत्तिर्भवति। अत इत्थं चापि अनुमीयतेऽत्र। देवदत्ते बहिरस्ति जीवित्वे सति गृहेऽसत्त्वाद् यो जीवनं यत्र नास्ति स ततोऽन्यत्रास्ति यथा 'अहम्' इति अतो व्यर्थमिदम् पञ्चमप्रमाणमिति इति नैयायिकमतमयुक्तम्।

तत्र यत्तेनोक्तं प्रमाणयोर्विरोधे सति परस्परविरुद्धज्ञानेष्वेकस्याऽप्रमाणत्वम्; तत्तु 'इदं रजतम्' 'नेदम् रजतम्' इत्यत्र सम्भवति; किंतु असाधारणप्रमाणयोर्विरोधेऽपि साधारणे प्रमाणेऽप्रामाण्यं न सिध्यति। यतः साधारणविषयस्य तु प्रामाण्यं विरोधेऽपि विषयान्तरे व्यवस्थितम्। यथा 'देवदत्तो गृहे बहिर्वा स्थितः, गृहे नावास्थितः' इति प्रमाणद्वयं चरितार्थम्; किंतु विरुद्ध- विषयत्वात् नानयोर्विरोधः। न च अप्रामाण्यम् 'इदं रजतम्' 'नेदम् रजतम्' इतिवत् सर्वथा विषयापहाराभावात्।[1]

यत्तु तार्किकैरुक्तम् अत्राविसन्दिग्धस्यैव देशविशेषस्य बाधो भवति न पुनर्जीवनं प्रमाणस्य तदयुक्तम्: यतोहि अनुमानेन देवदत्तस्य जीवनज्ञाने सति तस्य अवस्थितिज्ञानहेतवे देशसामान्यस्य सम्बन्धोऽपि ज्ञातव्यः। अत्र देशसामान्यं जातिरूपम् इति मते देवदत्तोऽपि देशरूपं भविष्यति। अतोऽनियतदेश एव देशसामान्यस्यार्थः। एवं सति असौ देवदत्तः 'क्वचिज्जीवति' इत्थं प्रकारेण जीवितपुरुषेण सह अनियतदेशसम्बन्धो ज्ञायते। उक्तञ्च मानमेयोदये-

---

१. मानमेयोदये, श्लोक-१३४-१३७

तस्माद् गृहे बहिर्वेति सन्दिग्धमपि कञ्चन।
विशेषमवलम्ब्यैव प्रमितं खलु जीवनम्।।[1]

अयमाशयोऽत्र देशसामान्येन गृहदेशो बहिर्देशो वा एतद्देशद्वयं गृहीतम्। अतो 'देवदत्तो गृहे बहिर्वा जीवति' इत्थं सन्दिग्धदेशः कस्यचिद् विशेषदेशेन सम्बद्धेन जीवनेन सह पर्यवसितः। तत्र गृहरूपविशेषदेशस्य अनुपलब्ध्या बाधिते सति बर्हिदेशरूपस्याऽन्यस्य गृहीतत्वात् पूर्वस्य निराश्रितजीवनप्रमाणस्य बाधोऽनिवार्यः। एवं बहिर्देशसम्बन्धेन पूर्वगृहाभावज्ञानविषयकसूक्ष्मस्य प्रतिरोधस्याज्ञातत्वात्, एवं तार्किका वदन्तिः यदत्र सन्दिग्धदेशस्यैव बाधो भवति न जीवनप्रमाणस्य।

तार्किकैर्यदुक्तं तथा सति 'पर्वतो बह्निमान्' इत्यादीनि प्रसिद्धानुमानान्यप्यर्थापत्तितामापद्यन्ते तदप्ययुक्तम्। यतोहि तत्र पर्वतेऽग्निप्रापकं साधारणं प्रमाणं किं नाम इति वक्तव्यम्। व्याप्तिग्राहकप्रमाणमेव 'पर्वतेऽग्निप्रापकम्' इति तर्कन्तु प्रभाकरमतखण्डनेनैव खण्डितं जातम्। यतोहि यद्यपि व्याप्तिग्रहणवेलायामेव पर्वतेन सह अग्निसम्बन्धज्ञानं भवति तथापि यः कश्चित् पुमान् अधुना महानस एव व्याप्तिं गृह्यमाणोऽदृष्टपर्वतः सः कथं पूर्वमेव तस्याग्निमत्त्वमवगच्छेत्। अत्र पर्वते दृश्यमानो धूमः स्वकारणीभूतमग्निम् आक्षेपयति इति तर्कमयुक्तम्। 'धूमोऽग्निमनुमापयतु' इत्थमेवात्र वक्तव्यम्। अतः सिद्धः पर्वतेऽग्नेरनुमापकोऽनुमानं साधारणप्रमाणम् अस्ति। अतोऽनुमानस्य अर्थापत्तौ समावेशोऽसम्भवः। पर्वतस्योर्ध्वभागे अग्नेर्बाधिते सति तस्याधोभागे (पर्वतमूले) अग्निकल्पना तु अर्थापत्तिरेव। तदेवं दिवावाक्यं न रात्रिवाक्यस्यानुमापकम्।

यत्पुनः देवदत्तस्य बहिर्भावसिद्ध्यर्थं- 'देवदत्तो बहिरस्ति जीवित्वे सति गृहाभावात्' इत्यनुमानं कल्पितम् तत्तु स्वरूपासिद्धो हेत्वाभासः न पुनरनुमापको सद्हेतुः। तस्य जीवनमात्रनिर्विशेषस्य निरूपयितुमशक्यत्वात्। यतोहि देशविशेषस्य निरूपणेन विना निर्विशेषस्य जीवनमात्रस्य निरूपणमसम्भवम्। अतो जीवनविशिष्ट-गृहाभावरूपस्य लिङ्गस्याप्रतिपत्तेः स्वरूपाज्ञानासिद्धोऽयं हेतुः। यथोक्तं बृहट्टीकायाम्-

---

१. मानमेयोदये, श्लोकः-१३७

तस्माद्यो विद्यमानस्य गृहाभावोऽप्यगम्यते।
स हेतुः स बहिर्भावं नागृहीत्वा च गृह्यते।।

'देवदत्तो बहिरस्ति गृहाभावात्', इत्यनुमानवाक्ये गृहाभावरूपस्य हेतोर्ज्ञानं तदेव स्यात् यद्धि बर्हिभावत्वं पूर्वं ज्ञातम्; अन्यथा देवदत्तः कुतो नास्ति मृतो वा इति ज्ञाते अभावमात्रमेव उक्तम्; न तु गृहाभावत्वम्। अतः सिद्ध्यते यदर्थापत्तिः अनुमानात् पृथगेव प्रमाणम्।

यत्तु तार्किकाणां निरासप्रसङ्गे प्रभाकरैः कथितम्; तत्तु उपहसनीयम्। अर्थात् 'देवदत्तो बहिर्देशसंयोगी गृहाभावे सति विद्यमानत्वात्' इत्यस्य निराकरणे तेनोक्तम् यदत्र जीवनं संशयग्रस्तम्। यतोहि देवदत्तः पुरा प्रायः वेश्यवर्ती स्यात् किंतु इदानीमदृष्टत्वात् तस्य जीवनं सन्दिग्धम्। तत्र सन्दिग्धं जीवनन्तु एतद्बहिर्भावस्य अनुमापकं नास्ति; किन्तु आक्षेपक एव सम्भवति[1]। यतोहि सन्दिग्धपदार्थोऽपि उपपादकस्य कल्पको भवति; अर्थापत्तेर्महिम्ना सन्दिग्धे जीवने सति पूर्वोक्ताऽनुमानस्य गृहाभावरूपहेतुसन्दिग्धविशेषणको भवति, अतोऽर्थापत्तिः अनुमानेन गम्यार्था न भवति। अत्र यदि गृहाभावनिरीक्षणाज्जीवनं सन्दिग्धमस्ति तर्हि आप्तवाक्यादिना तन्निर्णयः कार्यः। अथवा तस्य पत्न्याः वैवाहिकचिह्नसन्दर्शनेन निर्णयः कार्यः। यदि तस्य मरणस्य सूचकं चिह्नं न परिज्ञातं तर्हि तस्य जीवने सन्देहः किं भविष्यति। तथा सन्दिग्धजीवनाद् बहिर्भावस्य कल्पना अशक्या; यतोहि देवदत्तस्य मृतत्वस्यापि शङ्कायां 'देवदत्तो बहिरस्ति' इति ज्ञानं कथं स्यात्। 'यस्माज्जीवति वा न वा तस्माद्बहिरस्ति' एतादृशी कल्पना गुरुणा विना केनापि न क्रियेत। निष्कर्षोऽयं न सन्दिग्धपदार्थोऽर्थापत्तेर्हेतुत्वं गम्यते।

अस्यार्थापत्तेरुपमानगम्यत्वमपि न सम्भवम्; यतोहि सर्वत्र सादृश्यं श्रुतवाक्येनैव भवति नाश्रुतस्य। अतएवात्र दिवावाक्यवत् तदर्थो नोपमानमिति। वस्तुतोऽर्थापत्तिरेव रात्रौ भुङ्क्ते इत्यत्र प्रमाणम्। यथोक्तं श्लोकवार्तिके-

---

१. नन्वेतद् गृहाभाव दर्शनाज्जीवतो बहिर्भावकल्पनाऽनुमानमेव देवदत्तो बर्हिदेशसंयोगी, गृहाभावे सति विद्यमानत्वात्। अत्रोच्यते न तावद् विद्यमानत्वं लिङ्गं भवति स्वयं सन्देहास्यपदीभूतत्वात्। ..... नास्तिविरोधः। (पृ. २७३-२७६)

अतः श्रुतस्य वाक्यस्य यदर्थप्रतिपादनम्।
तदात्मलाभ एव स्याद् विना नेतयेतदिष्यते।।[1]

अत्र पीनत्वस्य भोजनप्रतिषेधयोश्च एक वाक्यत्वानुपपत्त्या तदुपपादनाय तच्छेषत्वेन रात्रिवाक्यं कल्प्यते। अर्थकल्पनावादिमतेऽत्र रात्रिभोजनवाक्यं पीनत्वस्योपपादकं नास्ति किं रात्रिभोजनमेव; अतः किं शब्दकल्पनया। अत्रेदं तर्कमनुचितं यद् विश्वजिदादिषु यागेषु फलादेः शाब्दत्वसिद्ध्यर्थं शब्दकल्पनम्। अत उक्तम् - **वाक्यार्थाच्च किं नायमागमार्थः प्रतीयते[2]**।

यथा शब्दाभिहितपदार्थगम्योऽपि वाक्यार्थः शब्दमूलस्तथा शाब्दः तथा वाक्यार्थानुपपत्तिगम्योऽर्थो वाक्यमूलतया शाब्दो भविष्यति। अत्र सविकल्पकविज्ञानैः शब्दः पूर्वं प्रतीयते। ततश्च प्रथमावगतेन शब्देनैव अनुपपत्तिपरिक्षयात् नार्थं यावदर्थापत्तिर्गन्तुमर्हति।

अत्रेदं तर्कमप्यनुचितं-यद् वाक्यार्थवद् आगमार्थत्वम् इति उच्यते। यतोहि लब्धप्रयोजने वाक्ये परं नागमिकमिति मीमांसकमतम्[3]। अयमाशयोऽत्र यावद्धि अकृतार्थं वाक्यं यत् कल्प्यते तत् सर्वं शाब्दं भवति पदार्थानां चावगतत्वेनाप्रयोजनत्वाद् तेष्वकृतार्थं वाक्यं तत्तद्द्वारा अप्रतिपन्नवाक्यार्थव्यवसायी इति युक्तं वाक्यार्थस्य आगमार्थत्वम्। ततः परन्तु पदार्थान्तरं ततः प्रागेव वाक्यस्य कृतार्थत्वात् न तस्यागमार्थत्वम्। अत्राकृतार्थत्वं शब्दे एव कल्पनीयः; यतोहि अन्येन वाक्य-स्याकाङ्क्षापूरणं न सम्भवति।

कथमसति सम्बन्धे प्रामाण्यमिति चेत् तर्हि परिहारोऽयं बाधाविरहः प्रामाण्ये कारणं न सम्बन्धः। अत उक्तम् कुमारिलेन श्लोकवार्तिके-

तस्मादसत्त्वे सत्त्वे वा सम्बन्धस्य यदेव नः।
जायेतामभङ्गुरं ज्ञानं तस्यैव स्यात् प्रमाणता।।[4]

---

१. श्लोकवार्तिके अर्थापत्तिपरि. श्लोक-७६

२. तत्रैव, श्लोक-७७

३. तत्रैव, श्लोक-७८

४. तत्रैव, श्लोक-८४

एवमर्थापत्तेः प्रामाण्यं निर्विवादरूपेण सिद्धम्। अनुमानात्तु भेदाभेदयोर्विवादः; तच्च पूर्वमेव निराकृतम्। अनुमानेऽपि बुद्ध्योपपाद एव सम्बन्धोपयोगः न प्रामाण्ये, अतः तच्चोत्पन्नायाः बुद्धेः स्वारसिकत्वमेव न तस्य प्रामाण्ये हेतुत्वम्। यथोक्तम्-

स्मृत्या श्रुतेर्या परिकल्प्यतेऽस्मिन् लिङ्गादिभिर्या विनियोजिका च।
तत् सर्वमित्याद्यसमञ्जसस्यान्न चेदियं स्यादनुमानतोऽन्या।।[१]

अर्थापत्तिरियं दृष्टार्थभेदेन द्विधा भवति। पूर्वोक्तानि उदाहरणानि दृष्टार्थापत्त्यैव। श्रुतार्थापत्तेरुदाहरणं यथा लोके 'द्वारम्' इत्युक्तौ तस्य सम्पूर्णतासिद्धये 'संव्रियताम्' इत्यादि शब्दान्तरं श्रुतशब्दस्यैकदेशत्वेन कल्प्यते। अतोऽत्र शब्दैकदेशसंवाद-स्यैकदेशत्वेन कल्पना भवति। एवं वेदेऽपि 'विश्वजिता यजेत' इत्यादौ स्वर्गकामः इति श्रुतेः एकदेशभूतवाक्यत्वेन शब्दान्तरं कल्प्यम्। एतत् सर्वं श्रुतार्थापत्त्या एव सम्भवति।

वस्तुतोऽत्र अपरिपूर्णस्य वाक्यस्यान्वयसिद्धये शब्दस्य अध्याहृतत्वात् **श्रुतार्थापत्तिर्भवति**[२] यथा 'द्वारम् द्वारम्' इति वाक्यस्यान्वयार्थं शब्दान्तरगम्यस्य आवरणादिरूपस्य अन्यस्यार्थस्य उपस्थितिरनिवार्या। तस्य श्रुतशब्दस्य अनुपलब्धेन बाधे सति अश्रुतशब्दगम्यत्वेन आवरणाद्यर्थः कल्पनीयः इति तात्पर्यम्। तत्र च शब्देन सहैव आवरणाद्यर्थकल्पनोद्युक्तः शब्दादेवार्थावगतेः लाघवतः शब्दमेव कल्पयति। इयमेव शब्दकल्पनारूपा श्रुतार्थापत्तिः।

यत्तु प्रभाकरैरुक्तं यदत्र आवरणाद्यर्थस्यैव कल्प्यतया शब्दाकल्पनाभावात् न श्रुतार्थापत्तिः; तदयुक्तम्। यतोहि शब्दोपस्थापितस्यार्थस्य शाब्देनार्थेन सहैव अन्वयं भवति; एतत् पूर्वमेव सिद्धम्। यदि च वाक्यपूरणार्थं अर्थ एव कल्प्यते तर्हि 'सूर्याय जुष्टं निर्वपामि' इत्यादौ सूर्यरूपोऽर्थ एव कल्पनीयः; न तु सूर्याय इति पदकल्पनमुचितम्। प्रकृतियागे पदार्पित एवायमंशो दृष्टः; अतएव विकृतावपि पदं कल्प्यम् इति चेदिदमप्युक्तम्। यतोहि नहि दृष्टमात्रेण विकृतावपि धर्मा

---

१. अर्थापत्तिपरि, श्लोक-८७

२. यत्रत्वपरिपूर्णस्य वाक्यस्यान्वयसिद्धये। शब्दोऽध्याहृियते तत्र श्रुतार्थापत्तिरिष्यते। (मानमेयोदये श्लोक-१५२)

आकृष्यन्ते; किंतु प्रयोजनाय एव। न तु तस्यांशस्य पदबोधितत्वेन भवतः किञ्चित् प्रयोजनमस्ति। यतोहि अन्वयोऽन्यथापि सिध्यति; अतो दृष्टत्वमात्रग्रहणे च अवघातगतमेव संस्कारान्तरं दृष्टम् इति अवघातोऽपि कृष्णलेषु कर्तव्यः स्यात्। तस्मात् श्रुतार्थापत्त्यैव पदाध्याहारः सम्भवति।

अतो निष्कर्षरूपेण वक्तुमिदं शक्यते यद् अर्थस्य अन्वयानुपपत्त्या वाक्ये यदुपपादकस्य कल्पना भवति सैवार्थापत्तिः। स च अनुमानादिभिर्भिन्ना प्रमाणरूपा। अस्यार्थापत्तेरनुमानेऽन्तर्भावो न सम्भवति। इयमर्थापत्तिर्दृष्टश्रुतभेदेन द्विधा भवति। कुमारिलमतेऽर्थापत्ते-र्द्वैविध्यमेवोचितम्। अत एतेन प्रभाकरमतं खण्डितम्; नैयायिकमतमप्यपास्तम्। श्रुतार्थापत्तौ पदकल्पना भवति, दृष्टार्थापत्तौ च वाक्यकल्पनम् एतत्सर्वमत्र विस्तरेण निरूपितम्। अतः श्रुतार्थापत्तिः शब्दकल्पनापरा दृष्टार्थापत्तिर्वाक्य-कल्पनापरा इति कुमारिलमतम्।

धर्मशास्त्रवाङ्मये दुर्गविधानम्

डॉ. जी. शङ्करनारायणः

एनात्तूर्, काञ्चीपुरम्

सप्ताङ्गं राज्यमिति राजनैतिकग्रन्था मुक्तकण्ठमामनन्ति। स्मृतयः, अर्थशास्त्रम्, धनुर्वेदः, पुराणेषु विद्यमानाः राजनैतिकांशाश्चात्र राजनैतिकग्रन्थशब्देन व्यवहृताः। ते च राज्यशासनाय अपेक्षितानि सप्ताङ्गानि विवृण्वन्ति यथा विष्णुस्मृतौ-

स्वाम्यमात्यदुर्गकोशदण्डराष्ट्रमित्राणि प्रकृतयः।।[1]

तथा च महाभारतप्रभृतयोऽपि ग्रन्था एवमेव अभिप्रायं प्रकटयन्ति। दिङ्मात्रं यथा महाभारतम्-

राज्ञा सप्तैव रक्ष्याणि तानि चापि निबोध मे।

आत्माऽमात्यश्च कोशश्च दण्डो मित्राणि चैव हि।।[2]

कौटलीयमर्थशास्त्रमपि राज्यसप्ताङ्गत्वेनैवमेवाऽभिव्यनक्ति-

स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतयः।।[3]

तेषां कार्यवैशिष्ट्यं तत्रैव निरूपितं यथा- सप्तस्वपि च राज्याङ्गेषु अन्यतममङ्गं भवति दुर्गम्। राज्ञा अवश्यं रक्षणीयेषु विषयेषु दुर्गस्य प्राधान्यं

---

१. विष्णुस्मृतौ ३/३३

२. महाभारते २/५/१३

३. कौटलीयार्थशास्त्रे ६/२

विदितचरमेव। अद्यापि परोक्षरूपेण गिरिदुर्गस्य धन्विदुर्गस्य तथा वनदुर्गस्य उपयोगः अक्षिगोचरः। तदुक्तं वृद्धहारीतेन-

दुर्गाणि तत्र कुर्वीत जनकोशात्मगुप्तये।[1]

आपस्तम्बप्रभृतयः स्मृतिकाराः दुर्गलक्षणानि वितेनुः। महाभारते रामायणे च दुर्गस्य स्वरूपं प्राधान्यञ्च प्रदर्शितम्। कौटलीयमर्थशास्त्रं द्वितीयाधिकरणे दुर्गनिर्माणं सविस्तरं निरूपयति। अतो दुर्गविधानस्य प्राधान्यं सम्यगवगम्यते।

वृद्धहारीतस्मृतिः

जनकोशात्मगुप्त्यर्थे रम्ये देशे दुर्गनिर्माणं तत्राध्यक्षस्थापनं च कर्त्तव्यमिति वृद्धहारीतेनैवं निरूपितं-

उपजीव्योपसर्पैश्च रम्ये देशे नृपोत्तमः।
दुर्गाणि तत्र कुर्वीत जनकोशात्मगुप्तये।।
तत्र कर्मसु निष्णातान्कुशलान् धर्मनिष्ठितान्।
सत्यशौचयुताञ्छुद्धानध्यक्षान् स्थापयेन्नृपः।।[2]

आपस्तम्बस्मृतिः

इयञ्च स्मृतिः गृह्यसूत्रकर्त्रा आपस्तम्बेन प्रपञ्चितेति ज्ञायते। अस्यामपि स्मृतौ पुरवेश्मप्रभृतीनां निर्माणप्रकार उक्तः। तत्र दक्षिणाद्द्वारेण पुरं कर्तव्यमिति स्मृतिरियं कथयति। पुरवेश्मामन्त्रणसभानिर्माणम्, तत्राग्निस्थापना, आमन्त्रणमतिथिर्वा-

सार्थम्, सभा अधिदेवनार्थं दक्षिणाद्द्वारं वेश्म पुरं च मापयेत् ।।
दक्षिणेन पुरं सभा दक्षिणोदग्द्वारा यथोभयं सन्दृश्येत बहिरन्तरञ्चेति।।
आवसथे श्रौत्रिया वराघ्यानतिथीन् वासयेत्।।
तेषां यथागुणमावसथाः शय्याऽन्नपानं विधेयम्।।[3]

---

१. वृद्धहारीतस्मृतौ ७/२३३

२. तदेव, ७/२३३-२३४

३. आपस्तम्बस्मृतौ, २/२४/२-५

सभाया मध्येऽधिदेवनमुद्धत्यावोक्ष्याक्षान्निवपेद्युग्मान् वैभीतकान् यथार्थान् ।।

आर्याः शुचयः सत्यशीला दीवितारः स्युः।।

एवमियं स्मृतिः पुरसभानां निर्माणं तन्निवेश्यांश्च कथयति।

विष्णुस्मृतिः

इयमपि स्मृतिः दुर्गाणां बाहुविध्यं सूचयति। यथा-

वैश्यशूद्रप्रायेऽर्थसम्पन्ने देशे षड्विधदुर्गान्यतमोदुर्ग आश्रयणीयो राज्ञा

राजा च जङ्गलं पशव्यं सस्योपेतं देशमाश्रयेत् ।।

वैश्यशूद्रप्रायं च।।

तत्रधन्वनृमहीवारिवृक्षगिरिदुर्गणामन्यतमं दुर्गमाश्रयेत् ।।[1]

महीदुर्गं मह्याम् इष्टकापाषाणादिनिर्मितं दुर्गम्। मह्याम् उच्चावचप्रदेश-प्रचुरमिति केचित् कथयन्ति। एवं दुर्गाणां षट्प्रकाराः अस्यां स्मृतौ निरूपिताः।

मनुस्मृतिः

सर्वैः समादृता इयं स्मृतिः प्रायशः सर्वैरनुष्ठीयते। लोकसृष्टिप्रभृतयः सर्वेऽपि प्रकाराः अस्यां निरूपिताः। राजधर्मनिरूपणावसरे दुर्गनिर्माणमपि निरूपितम्। यथा-

जाङ्गलं सस्यसम्पन्नमार्यप्रायमनाविलम् ।
रम्यमानतसामन्तं स्वजीव्यं देशमावसेत्।।
धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत्पुरम् ।।[2]

एवं षड्विधदुर्गाणि निरूप्य तत्र गिरिदुर्गस्य प्राधान्यमपि मनुना प्रोक्तं यथा-

---

१. विष्णुस्मृतौ ३/६, राकौ. २२७ (वृक्ष.)

२. मनुस्मृतौ. ७/६५

सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् ।
एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते।।
त्रीण्याद्यान्याश्रितास्त्वेषामृगार्ताश्रयाप्सराः।

अन्येषामपि दुर्गाणां स्वरूपमपि तत्रैव निरूपितं यथा-

त्रीण्युत्तराणि क्रमशः प्लवङ्गमनरामराः।।
यथा दुर्गाश्रितानेतान्नोपहिंसन्ति शत्रवः।
तथाऽरयो न हिंसन्ति नृपं दुर्गसमाश्रितम् ।।
एकः शतं योधयति प्राकारस्थो धनुर्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विधीयते।।
मन्दरस्यापि शिखरं निर्मानुष्यं न शिष्यते।
मनुष्यदुर्गं दुर्गाणां मनुः स्वायम्भुवोऽब्रवीत्।।
तत्स्यादायुधसम्पन्नं धनधान्येन वाहनैः।
ब्राह्मणैः शिल्पिभिर्यन्त्रैर्यवसेनोदकेन च।।[1]
तस्य मध्ये सुपर्याप्तं कारयेद् गृहमात्मनः।
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम् ।।[2]

एवं मनुस्मृतिर्दुर्गाणां भेदान् निरूप्य तन्माहात्म्यमपि निगदति। तत्र मनुष्यदुर्गं मनुना प्रथमतया उद्भावितमिति स्मृतिरियं कथयति।

याज्ञवल्क्यस्मृतिः

इयं स्मृतिः व्यवहारादिषु प्रमाणप्रदा भवति। अस्यां राजधर्मनिरूपणावसरे दुर्गस्य निर्माणे चोदनैव दृश्यते।

रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत् ।
तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये।।[3]

---

१. मनुस्मृतौ ७/७०-७५

२. तदेव ७/७६

३. यज्ञवल्क्यस्मृतौ १/३२१

इति सामान्यतया दुर्गाणां निर्माणे आवश्यकतां कथयतीयं स्मृतिः।

बृहस्पतिस्मृतिः

इयं स्मृतिः ईषद्विशदतया दुर्गस्य निर्माणं निरूपयति। प्रथमं दुर्गस्य आवश्यकतां निरूप्य ततश्च दुर्गाणां भेदान् कथयति। तत्र आयुधानां स्थापनं तन्निर्माणे उपयोक्तव्यान् जनानिति सर्वं निगदतीयं स्मृतिः। दुर्गाणां परितः शालाट्टपरिखादीनां निर्माणप्रकारोऽपि अस्यां स्मृतौ निरूपितः।

आत्मदारार्थलोकानां सञ्चितानां च गुप्तये।
नृपतिः कारयेद्दुर्गं प्राकारद्वासंयुतम् ।।[1]
औदकं पार्वतं वार्क्ष्यमैरणं धान्वनं तथा।।[2]
भूतानामिन्धनरसैर्वैत्रशष्पान्नवाहनैः ।
यन्त्रायुधैश्च विविधैः स्निग्धैः शूरैर्नरैर्युतम्।।
वेदविद्याविदो विप्रान् क्षत्रियानग्निहोत्रिणः।
आहृत्य स्थापयेत्तत्र तेषां वृत्तिं प्रकल्पयेत्।।
अनाच्छेद्याः करास्तेभ्यः प्रदद्याद् गृहभूमयः।
मुक्ता भाव्याश्च नृपतिर्लोकयित्वा स्वशासने।।
नित्यं नैमित्तिकं काम्यं शान्तिकं पौष्टिकं सदा।
पौराणां कर्म कुर्युस्ते सन्दिग्धे विनयं तथा।
समा निम्नोन्नता वाऽपि यत्र भूमिर्यथाविधा।
शालाट्टपरिखाद्याश्च कर्तव्याश्च तथाविधाः।।
समन्तात्तत्र वेश्मानि कुर्युः प्रकृतयस्ततः।
द्विजवैद्यवणिक्शिल्पिकारुकाः रक्षकास्तथा।
स्थलावस्थाननिष्काशभ्रमश्वभ्रचतुष्पथान्।
समाजविक्रयस्थानगोव्रजांश्चैव कल्पयेत्।।

---

१. बृहस्पतिस्मृतौ. ४०, १०२
२. तदेव. १०२

दुर्गमध्ये गृहं कुर्याज्जलवृक्षान्वितं पृथक्।
प्राग्दिशि प्राङ्मुखीं तस्य लक्षण्यां कल्पयेत्सभाम्।।
माल्यधूपासनोपेतां वीररत्नसमन्वितताम् ।
प्रतिमालेख्यदेवैस्तु युक्तामग्नयम्बुना तथा।।[1]

बृहत्पराशरस्मृतिः

इयं स्मृतिः केवलं दुर्गाणां निर्माणं तस्यापि रक्षणं कर्तव्यमिति कथयति। यथा-

यथोदितानि दुर्गाणि कुर्यात्तेष्वपि रक्षणम्।।[2]

आश्वलायनस्मृतिः

इयं स्मृतिः षड्विधानां दुर्गाणां नामानि उल्लिख्य ततश्च बुद्ध्यैव इमानि निर्मापितव्यानीति निगदति। पुनश्च तत्र भवितव्यान् जनान् अधिकारिणः अनुजीविनश्च कथयति।

पुरं सुदुर्गमाश्रित्य वसेत्सुप्रयतो नृपः।।
धन्वदुर्गमपां दुर्गं गिरिदुर्गं च वा नृपः।।
वनदुर्गं नृदुर्गं च महीदुर्गं च वा वसेत् ।
नरदुर्गं विशिष्टं स्याद्धन्वदुर्गमथापि वा।।[3]
षण्णां तु बुद्धिदुर्गेण युक्तं चेदावसेत्पुरम् ।
आचार्यानृत्विजो वैद्यान् याचकान्नटनर्तकान्।।
सूतमागधसूदांश्च सम्पूज्याऽऽत्मनि वासयेत्।
पक्षिणो विविधाकाराः पुण्याः पश्वरगाः शुभाः।।
गोगजाश्वाजमहिषरासभोष्ट्राविकादयः ।
श्वमार्जारकपिप्राज्ञचिकित्सककुलालकाः।।

---

१. बृहस्पतिस्मृतौ ४१-४३
२. तदेव. १२/१४
३. आश्वलायनस्मृतौ ८/१०९-११६

कर्मारः स्वर्णकारश्च चर्मकारकृषीवलाः।
सूचीकाराश्च रजकाः सर्ववर्णाश्च शिल्पिनः।।
वैतालिका बन्दिनश्च रसा धान्याविषाशुनाः।
तिलतैलतुषाङ्गारयन्त्रादर्शयुधानि च ।।
औषधानि च सर्वाणि काष्ठापाता रथादयः।
यौधाः कुब्जा वामनाश्च स्त्रियश्चाप्सरसोपमाः।।
एतान्सर्वान्पुरो राजा सद्यः सम्यक्परीक्षितान्।
आत्ममधिष्ठिते नित्यं संस्थाप्य परिपालयेत्।।
पुरराज्याद्विनिर्गच्छन् तावतैः सहयाखिलैः।
मृगयायामृते प्रायो गच्छेदेव नृपोत्तमः।।[1]
पृथिव्यां यानि यानीह सन्ति वस्तूनि भूपतिः।
तानि सर्वाणि यत्नेन स्वपुरे स्थापयेत्सदा।।[2]

एवं धर्मशास्त्रग्रन्थेषु दुर्गाणां तद्युक्तपुराणाञ्च निर्माणप्रकारा निरूपिताः। एषु आश्वलायनस्मृतिरेव सर्वतोऽप्यधिकतया दुर्गविधानं कथयति। धर्मशास्त्रग्रन्थाः षड्विधानपि दुर्गान्निगदन्ति।

इमे ग्रन्था विशिष्य षड्विधदुर्गाणि कथयन्ति। तानि च धन्वदुर्गम्, नरदुर्गम्, महीदुर्गम्, वारिदुर्गम्, वृक्षदुर्गम्, गिरिदुर्गञ्चेति निगदितानि। एतेषु गिरिदुर्गस्य प्राधान्यं सर्वैरङ्गीकृतम्। वस्तुतो दुर्गाणां निर्माणं तावत् राज्ञां राष्ट्रस्य च रक्षणायेवेति सामान्यविचारेणैवावगन्तुं शक्यते। किन्तु तत्र तत्तद्देशोचिततया, कालोचिततया च दुर्गाणां निर्माणं भवितव्यम्। अतएव इदानीन्तनकाले दुर्गनिर्माणं नास्ति अथापि हिमालयप्रभृतिपर्वताः, समुद्राश्च परोक्षरूपेण दुर्गस्य कर्म कुर्वन्ति। अतः तदानीमुक्ताः नियमाः इदानीमपि सङ्गच्छन्ते। धर्मशास्त्रीयग्रन्थेष्वेतेषु वर्णिता दुर्गस्य निर्माणप्रक्रियाः तेषामुपयोगश्च नितरामाश्चर्यदायकाः विषयाः।

---

१. आश्वलायनस्मृतौ ८/४०-४३

२. आश्वलायनस्मृतौ ८/१२५

नदीपरिवेष्टनसरोयुक्तपङ्किलायाञ्च भूमौ कृतानि दुर्गाणि तत्तद्देशस्य आनुकूल्येन क्रियन्त इति घोषयन्ति ज्ञानस्यैव दर्पणभूताः इमे ग्रन्थाः।

एषु च इदानीं भारते अवशिष्टानि दुर्गाणि दुर्गनिर्माणप्रक्रियायाः निदर्शनभूतानि सन्ति। एषु च दुर्गेषु शास्त्रोक्तदिशैव देशानुसारिणी दुर्गनिर्माणप्रक्रिया प्रविहितेति सम्यगवगम्यते। पर्वतप्रान्तेषु पार्वतम्, तथा समायां भूमौ महीदुर्गमिति इदानीमपि समुपलभ्यानि दुर्गाणि अस्माकं पूर्वजानां वैदग्ध्यं विशदयन्ति।

अतः सर्वत्रापि शास्त्रानुसारिणोऽस्माकं पूर्वजाः एवमौपयोगिकशास्त्रेषु अतीव निष्णाता आसन्निति कालक्रमादिदम् अपूर्वं ज्ञानं लुप्तमित्यपि अवगम्यते। पाश्चात्यदेशेषु किञ्चित्कालात्प्राक्तनानामपि भवनानां विशेषरक्षा दृश्यते। किन्तु अस्माकं देशे चरित्रकालात्प्रागेवारभ्य उपलभ्यमानानाम् एतादृशविषयाणां रक्षणे अस्माभिः सुदृढा सुदीर्घा च दृष्टिरपेक्षिता इत्यस्य शोधपत्रस्य मुख्यं लक्ष्यमिति उपस्थापयामि।

◆◆◆

वेदानामीश्वरकर्तृत्वेऽपौरुषेयत्वविमर्शः

डॉ. प्रयागनारायणमिश्रः
प्रवक्ता, संस्कृतविभागे,
लखनऊविश्वविद्यालये

भारतीयधर्मस्य तत्त्वज्ञानस्यैकमात्रमूलभूतग्रन्थत्वेनाऽधिष्ठितानां वेदानामस्तित्वमस्ति सर्वविदितमेव लोके। वैदिकमतावलम्बिना-मभिमते तु वेदानां नित्यत्वमपौरुषेयत्वञ्चाऽवश्यमेवाङ्गीकार्ये स्तः। विषयेऽस्मिन् मीमांसकानां स्थापना विशेषतयोल्लेखनीया वर्तते। पुरुषगतभ्रमप्रमादविप्रलिप्सादिभिर्दोषै रहितान् वेदान् मीमांसको न केवलमपौरुषेयान्नपितु नित्यांश्च मनुते। मीमांसकाभिमते वेदानां प्रामाण्यार्थमन्यप्रमाणानामावश्यकता न वर्तते, तेषां स्वतःप्रमाणसिद्धत्वात्। अतो वेदप्रामाण्यविषयेऽनेनाऽवोचि-

'अकर्तृके च वेदे निर्दोषत्वमेव प्रामाण्यप्रयोजकमस्तु'[1]

अतो मीमांसकाऽभिमते वेदास्सन्त्यकर्तृका नित्याश्चेति। वेदानां नित्यत्वे सति प्रलयोत्तरं पूर्ववेदनाशादुत्तरवेदस्य प्रामाण्यं कथं भवितुमर्हतीत्याशङ्काप्रसङ्गे मीमांसकैः प्रलयसम्भव एव निराकृतः। प्रलयविरोधे मानाभाव इत्युक्त्वा मीमांसकः षट्सङ्ख्यकान् हेतून् निर्दिशति। किमधिकं मीमांसकः सर्गमपि नित्यमङ्गीकरोति समसन्तत्यापत्तेः।[2]

किन्तु **'कर्तारं विना कथं कार्यम्'**[3] इति न्यायसिद्धान्तमनुसृत्य कार्यस्य

---

१. न्यायकुसुमाञ्जलौ, संस्कृतभाष्यम्, पृष्ठे- ९०

२. तत्रैव, पृष्ठे- ९२-९३

३. षण्मतनाटके, पृष्ठे- ६४

हेतोरवश्यम्भावित्वान्नैय्यायिका मीमांसकसम्मतानां सर्वेषां पक्षाणां निर्मूलनं कृत्वा वेदान् नित्यान् अकर्तृकांश्च नैवाऽङ्गीकुर्वन्ति।[1] 'शब्दस्याऽनित्यत्वम्, उत्पन्नो गकार 'इति प्रतीति-सिद्धत्वात् सर्वथा सिद्धमेव।[2] अतः शब्दस्याऽनित्यत्वे वेदानां नित्यत्वं कथमपि न सिद्धिमुपयाति। इत्थं वेदानामनादित्वमपौरुषेयत्वं नित्यत्वञ्च नाङ्गीचक्रुर्नैय्यायिकाः। अतो वेदकर्तृरूपत्वेनेश्वरसिद्धिं प्रतिपादयता नैय्यायिकवर्गेणाऽभिहितं यच्छाब्दी प्रमा वक्तृयथार्थरूपगुणजन्या इति गुणाधारतया ईश्वरसिद्धिः। प्रलयसम्भवात् प्रलयोत्तरं पूर्ववेदनाशादुत्तरवेदप्रामाण्यार्थं यस्य महाजन-परिग्रहस्याऽवश्यकता वर्तते सोऽयं महाजनोऽणिमादिशक्तिसम्पन्नो विश्वासनिर्माणसमर्थो भगवान्नीश्वर एव स्वीकार्यः, यथोक्तमत्र न्यायकुसुमाञ्जलौ-

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात्।
तदन्यस्मिन्नविश्वासान्न विधान्तरसम्भवः।।[3]

उदयनाचार्येण वेदकर्तृरूपेण यस्येश्वरस्योल्लेखः कृतः सोऽयमीश्वरः पृथिव्यादिकार्यानुमितिसत्तात्मकः सर्वज्ञः परमेश्वर एवास्ति-

वेदस्य कर्ता पृथिव्यादिकार्यानुमितिसत्ताकः परमेश्वरः सर्वज्ञः[4]

आगमडम्बरमित्यपराभिधे षण्मतनाटके विद्वत्तल्लजेन जयन्तभट्टेन सर्वप्रथमं जगत्कर्तृरूपेणेश्वरसिद्धिं[5] विधायैतस्यैवेश्वरस्य वेदकर्तृत्वं दृढीकुर्वता अवोचि न्यायमञ्जर्याम्-

कर्ता य एव जगतामखिलात्मवृत्तिः
कर्मप्रपञ्चपरिपाकविचित्रताज्ञः।
विश्वात्मना तदुपदेशपराः प्रणीता-
स्तेनैव वेदरचना इति युक्तमेतत् ।।[6]

---

१. न्यायकुसुमाञ्जलौ, पृष्ठे- ८७-१३५
२. तत्रैव, पृष्ठे- ९१
३. न्यायकुसुमाञ्जलौ, २/१ पृष्ठे-८७
४. न्यायकलिकायाम्, पृष्ठे- ४
५. आगमडम्बरे ४/४०-४१
६. न्यायमञ्जर्याम्, प्रथमे भागे पृष्ठे- २२०

साक्षात् परमेश्वररूपेणाऽभिव्यक्तोऽयं वेदकर्ता त्रैलोक्यनिर्माणक्षमः परमो देवः क्लेशकर्मविपाकादिपरामर्शविवर्जितः कृपान्वितो नित्यानन्दश्चाऽस्ति-

वेदस्य पुरुषः कर्ता न हि यादृशतादृशः

किन्तु त्रैलोक्यनिर्माणनिपुणः परमेश्वरः।

स देवः परमो ज्ञाता नित्यानन्दः कृपान्वितः

क्लेशकर्मविपाकादिपरामर्शविवर्जितः।।[1]

आचार्यैर्बहुधा निरूपितोऽयमीश्वरः प्रायः पुरुषसञ्ज्ञयाऽभिधीयते। वेदस्य कर्ताऽयं पुरुषः कोऽपि यादृशतादृशपुरुषो नाऽस्ति। स तु ऋग्वेदे पुरुषसूक्ते प्रपञ्चितोऽखिलब्रह्माण्डस्रष्टा विश्वस्याऽस्यादिदेवत्वेन प्रतिष्ठितो जातः। अतएव श्रीमद्भगवद्गीतायाम् लौकिकदिव्योत्तमपुरुषरूपेणाऽयमेवं प्रोक्तः-

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।

यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः।।[2]

अनेनैव पुरुष इति विशिष्टसञ्ज्ञालङ्कृतेनेश्वरेणाऽथवा पुरुषविशेषेण वेदकर्तृत्ववशादेव नैय्यायिकैरन्यैः सार्द्धं जयन्तभट्टस्याऽयं प्रयोगो वेदानां पौरुषेयत्वं साधयितुमेव प्रतिभाति, किन्तु सूक्ष्मान्वेषणेनेदं निर्णेतुं शक्यते यद् वेदा अपौरुषेया एव, पुरुषस्याऽस्येश्वरत्वाद् यतो हि वेदकर्तृरूपेण यस्य पुरुषस्योल्लेखः कृतः स तु लौकिकपुरुषव्यतिरिक्तः कोऽप्यन्य एवाऽस्ति जगदीश्वरस्वरूपत्वेन।

अतः **'त्वमादिदेवः पुरुषः पुराणः'**[3] इत्यादिरूपेणाऽस्येश्वरस्य पुरुष इत्यभिधाने मानोपलब्धिमङ्गीकृत्य पुरुषपदं पुरुषं वा ईश्वरस्य पर्यायं मत्वा तत्कर्तृकत्वाद्वेदानां पौरुषेयत्वमथवा लौकिकरचनासादृश्यं कथमपि न सिद्ध्यति।। अतो वेदानामीश्वरकर्तृत्वेऽपि सर्वथाऽपौरुषेयत्वमेवोपपद्यते।। अतः पूर्वपक्षरूपेण वेदानां मीमांसाभिमतं नित्यत्वमनादित्वं वा निरूप्य कस्मिंश्चित्कार्ये तत्

---

१. न्यायमञ्जर्याम्, प्रथमे भागे १/१७५

२. श्रीमद्भगवद्गीतायाम् १५/१७

३. तत्रैव ११/३८

कारणस्यावश्यम्भावित्वाद् एषामवधारणञ्च निराकृत्य जयन्तभट्टेन वेदकर्तृरूपेण यदीश्वरप्रामाण्यमभिव्यञ्जितं तेन निश्चप्रचमेवाऽवगम्यते यदखिलजगद्-विधातृत्वादस्यैवेश्वरस्य सृष्टिर्वेद इति-

एवं जगत्सर्गवत्, स एव वेदानाम्येकः प्रणेता भवितुमर्हति।[१]

मतमिदमागमडम्बराभिधे षण्मतनाटकेऽनेनरूपेण निदर्शितमाचार्यप्रवरेण भट्टजयन्तेन-

विधाता विश्वात्मा सकलजगतामेष च यथा
प्रणेता वेदानामपि स हि तथैवाऽमलमतिः।।[२]

अत्राऽखिलजगतां विधाता य ईश्वरो विश्वात्मा इति प्रोक्तः तेनैकेनैवेश्वरेण कर्तृत्ववशादेव वेदानां प्रामाण्यमङ्गीकार्यम्, न तु स्वत एव, यतोहि ईश्वरबहुत्वे काचन युक्तिर्नोपलक्ष्यते-

वेदानामीश्वरोक्तत्वात् प्रामाण्यं न पुनः स्वतः।
न चेश्वरबहुत्वेऽपि युक्तिः काचन विद्यते।।[३]

वेदानां भिन्नभिन्नाऽभिप्रायत्वपरस्परविरोधित्ववशाद् यदेककर्तृत्वमाक्षिप्यते, ईश्वरेऽनेकत्वञ्चोप-कल्प्यते तत्तु सर्वथा शास्त्रविरुद्ध एव यतोहि **'एकं सद् विप्रा बहुधा वदन्ति'**[४] इत्यादिरूपेणाक्षेपोऽयं श्रुतिष्वपि निराकृतो जातः। ईश्वरस्य यानि बहूनि नामधेयानि दृष्टिपथमुपयान्ति तानि तु तस्येश्वरस्य महदैश्वर्यवाचकानि एव सन्ति। एतस्मादेव कारणादीश्वरोऽयमुपनिषत्स्वपि बहुधा निरुक्तो वर्तते-

स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमा।।[५]

---

१. न्यायमञ्जर्याम्, प्रथमे भागे, पृष्ठे- २१९
२. षण्मतनाटके ४/४३
३. षण्मतनाटके ४/५५
४. ऋग्वेदे १/१६४/६४
५. कैवल्योपनिषदि १/८

नैय्यायिकाचार्येण जयन्तभट्टेनाऽपि **'एकः शिवः पशुपतिः कपिलोऽथ विष्णुः'**[१] इत्यादिरूपेण सुष्ठूक्तं यदव्याकृते परमात्मनि कोऽपि भेदो नाऽस्ति। न्यायमञ्जर्यामनेनेदं मतमनेनरूपेण सुष्ठु निभालितम्-

'अत एवैक ईश्वर इष्यते न द्वौ न बहवो वा'[२]

इत्थमीश्वरैकत्वे सिद्धेऽथ चैतेनैवेकेश्वरेण वेदकर्तृत्वे सर्वथासिद्धे सङ्क्षेपेणेदं **वक्तुं** शक्यते यद्वेदरचनासम्बद्धे लेशमात्रमपि दत्तचित्तो विद्वान् वेदानीश्वरसम्बद्धान् **अवश्यमेवाङ्गीकरोति। 'अतो नित्यानुमेयोऽपि कर्ता वेदस्य विद्यते'**[३] इत्यादिरूपेण **नैय्यायिकाभिमते वेदा ईश्वरस्य कार्यं ईश्वरं वा वेदानां कर्तारं निश्चप्रचमेवाऽवगन्तुं शक्यते।** भगवता वादरायणेनापि ब्रह्मसूत्रे **'शास्त्रयोनित्वात्'**[४] इति सूत्रेण **वेदानां ब्रह्मकार्यमुपपादितम् 'यस्य निःश्वसितं वेदाः'**[५] इत्यादिरूपेण वेदानामीश्वर-निःश्वासरूपत्वं प्रतिपाद्य यत्तेषां नित्यत्वमपौरुषेत्वञ्चाऽभिहितं तदपि वेदानामीश्वरप्रभवमभिव्यनक्ति। ब्रह्मणि शास्त्रयोनित्वेऽपि 'महतः ऋग्वेदादेः कारणं ब्रह्म' इत्युक्त्वाऽभ्यधायि आचार्यप्रवरेण शङ्कराचार्येण यत् सर्वज्ञगुणान्वितस्य ऋग्वेदादिलक्षणस्य शास्त्रस्योद्भवः सर्वज्ञादन्यतो भवितुं न शक्यते-

'नहीदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः सम्भवोऽस्ति।'[६]

किमधिकं ऋग्वेदीयेऽपि पुरुषसूक्ते यज्ञस्वरूपपरमपुरुषादेव ऋग्वेदादेरुद्भवस्य स्पष्टतयोल्लेखो विहितः-

तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ।।[७]

---

१. षण्मतनाटके ४/५७
२. न्यायमञ्जर्याम्, प्रथमे भागे पृष्ठे- १८४
३. षण्मतनाटके ४/३६
४. ब्रह्मसूत्रे १/१/३
५. ऋग्वेदे सायणभाष्यभूमिकायां मङ्गलश्लोकः-२
६. ब्रह्मसूत्रशाङ्करभाष्ये, पृष्ठे- २२१
७. ऋग्वेदे १०/९०/९

अतः स्वमतपुष्ट्यर्थं स्वरूपं तु किमपि भवतु वेदानामीश्वरजन्यत्वं तु सर्वथासिद्धमेवाऽस्ति। अतो वेदा ईश्वरस्य कार्यमस्ति नाऽस्त्यत्र शङ्काया अवसरो लेशमात्रमपि। कस्यचिदपि विषयस्य पौरुषेयत्वसिद्ध्यर्थं तस्य कर्तुः शरीरित्वं परमावश्यकं वर्तते तत्तु वेदकर्तरि परमात्मनीश्वरे कथमपि नोपलभ्यते। श्वेताश्वतरोपनिषदि सर्वज्ञानमयस्य भगवतो यस्य पुरुषस्योल्लेखः कृतः स तु विभिन्नशरीरावयवाऽभावे सर्वथाऽशरीर्येव-

अपाणिपादो यवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।
स वेत्ति सर्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति।।[1]

न्यायकुसुमाञ्जलावपि न्यायतत्त्वमर्मज्ञेनाचार्येणोदयनाख्येनेश्वरेऽस्मिन्नि-न्द्रियाणामभावोऽङ्गीकृतः-

'आप्तोक्तश्चेत् एतदर्थगोचरज्ञानवतो नित्यसर्वविषयकज्ञानवत्त्वं इन्द्रियाद्यभावात्।।'[2]

कोऽपि पुरुषस्तु विभिन्नरागादिमलबन्धनैर्युक्तोऽसर्वविद्भवति किन्तु वेदकर्ताऽयं परमपुरुषो लौकिकपुरुषोचितस्वाभाविकधर्मैं रहितः सर्वज्ञ एव यतोहि नित्यानन्दात्मिके शिवे रागादयो दोषाः कथं सम्भाव्यन्ते-

पुंसामसर्ववित्तं हि रागादिमलबन्धनम्।
न च रागादिभिः स्पृष्टो भगवानिति सर्ववित्।
इष्टानिष्टार्थसम्भोगप्रभवः खलु देहिनाम्
रागादयः कथं ते स्युर्नित्यानन्दात्मके शिवे।।[3]

ईश्वरस्याऽस्याऽशरीरित्वेऽवयवैर्विना तस्मिन् कर्तृत्वकल्पनाऽसम्भवैव 'इत्याक्षेपप्रसङ्गे न्यायविच्छास्त्रमर्मज्ञैर्भणितं यदशरीरी आत्मवच्छरीरीश्वरो वेदकर्तृत्वे सर्वथा क्षमोऽस्ति तस्य ज्ञानचिकीर्षाप्रयत्नयोगित्वात्, यथाऽवोचि न्यायमञ्जरीकारेणाचार्येण जयन्तेन-

---

१. श्वेताश्वतरोपनिषदि ३/१९

२. न्यायकुसुमाञ्जलौ संस्कृतभाष्ये, पृष्ठे- १३५

३. न्यायमञ्जर्याम् १/१८४

'ज्ञानचिकीर्षाप्रयत्नयोगित्वं कर्तृत्वमाचक्षते तच्चेश्वरे विद्यते'[1]

'अपाणिपादो जवनो गृहीता'[2] इत्यादिभिरुपनिषद्वचनैर्मतमिदं पूर्वमेव समर्थितम्। अतोऽखिललौकिकरागादिप्रपञ्च-रहितस्याऽगोचराऽनन्तनित्यस्य सर्वज्ञस्य सर्वथासिद्धस्यैकैवेश्वरस्य वेदकर्तृत्वन्तेषां वेदानामपौरुषेयत्वमेवाऽभिव्यनक्ति यतोहि वेदानां पुरुषकर्तृत्वमीश्वरकर्तृत्वमेवाऽस्ति ईश्वरस्याऽस्यापुरुषत्वात्।

---

१. न्यायमञ्जर्याम्, प्रथमे भागे, पृष्ठे- १८५

२. श्वेताश्वतरोपनिषदि ३/१९

काव्येषु मुक्तकं श्रेयः

डॉ. रामसुमेरयादवः
उपाचार्यः, संस्कृतविभागे
लखनऊविश्वविद्यालये

लोकोत्तरवर्णनानिपुणं कविकर्म काव्यमिति सामान्यं काव्यस्वरूपम्। सद्यः परनिवृत्तिश्च सरसकाव्यश्रवणानन्तरमेव ब्रह्मास्वादसहोदरो, लौकिकाह्लादात्मकः, स्वप्रकाशानन्दचमत्कारस्वरूपो रसास्वादः, सहृदयहृदयसंवेद्यः सचेतसामपि हृदयङ्गमो भवति।[1] शरीरिणां यथा शारीरिकबुभुक्षापिपासाशान्तये मिष्ठान्नफल-दुग्धाहारपानसम्पादनार्थं परमप्रशस्यशस्यद्राक्षारसालतमाल वनोपवनगिरिनद्यादि-भौतिकपदार्थानां रचना ब्रह्मणा विधीयते। तथैव हि मानसिकबुभुक्षाशान्त्यर्थं तथा चाध्यात्मिकतोषावाप्तये सारस्वत्याः सृष्टेरपि विरचनं काव्यपुरुषैर्विधीयते। श्रुत्यनुसारेण-

स पर्यगाच्छुक्रमकायमब्रणमस्नाविरं शुद्धमपापविद्धम्।

"कविर्मनीषी परिभूर्याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः"

इति स्वतः प्रमाणभूता श्रुतिरेव प्रमाणयति साहित्यदर्पणे विश्वनाथेन काव्याच्चर्तुवर्गफलप्राप्तिः कथिता, यथा-

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्य-निषेवणम्।"[2]

---

१. काव्यप्रकाशे १-२

२. साहित्यदर्पणे - प्रथमपरिच्छेदे श्लोकसङ्ख्या-१

अपि च-

नरस्त्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्त्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा।[1]

संस्कृतभाषायां गीतिकाव्यं मुक्तकं प्रबन्धमिति द्विप्रकारेणोपलभ्यते। यत् सन्दर्भादिभिर्बाह्योपकरणैर्मुक्तं भूत्वा रसवत्तां जनयति तदेव मुक्तकं काव्यम्। मुक्तकं बोद्धुं बाह्यसाधनामावश्यकता नैव भवति। मुक्तकं तु रसालरस इव मोदकं भवति। यस्य रसास्वादमात्रेण सचेतसां हृदयानि सद्य एव तृप्तिं यान्ति। ये आलोचकजना रसपुष्टिहेतवे प्रबन्धकाव्यमेव स्वीकुर्वन्ति किं तेनावगच्छन्ति यद् ध्वन्यालोककारेणाचार्यानन्दवर्धनेन "मुक्तकेषु हि प्रबन्धेष्विव रसावबन्धाभिनिवेशिनः कवयो दृश्यन्ते।"[2] इति लिखितम् भर्तृहरिणा विलिखितानि शतकानि तथा च अमरुककविना प्रणीतं शतकं मुक्तककाव्यरूपत्वेन जगति प्रसिद्धानि। मुक्तकेषु सङ्गीतसमन्वितेषु छन्दःसु शृङ्गार-नीति-वैराग्यादीनां प्राकृतिकदृश्यानां मनोहारिवर्णनं वर्तते। मुक्तककाव्येषु कोमलभावनानां मधुरिमा विद्यते। तथा चेदं काव्यं प्रत्येकरसिकजनानां हृदयानि हठादावर्जयति। अस्मादेव सर्वेषु काव्येषु मुक्तकस्य श्रेयस्त्वं विपश्चितां मध्ये ख्यातमिति। रमणीजनानां सौन्दर्यमेषु काव्येषु स्वाभाविकतया परिस्फुटितं विद्यते। रसिकानां कृते नारीजनानां रूपं लावण्यञ्च प्रमोदं जनयतः। शृङ्गारस्य विभिन्नावस्थायाश्चित्रणं मुक्तकानां महती विशेषता। मुक्तकानामध्ययने नारीप्रेम्णः, उदात्ततताया विशुद्धतायाश्च परिचयः प्राप्यते। प्रकृतिचित्रणं प्रमुख्येन विद्यते। बाह्याप्रकृतिरन्तःप्रकृतिश्च मिथः सजीवतयात्र वर्णिते। संयोगवियोगयोरपि प्रकृतिर्मानवहृदय-माकर्षयत्येवमुल्लसितञ्च हृदयं प्राकृतिकं सौन्दर्यं नितरां द्विगुणायते।

लौकिकं धार्मिकञ्चेति मुक्तकस्य भेदद्वयं कर्तुं शक्यते। लौकिकं हि तत्र लोकस्य नानाविषयैस्सह सम्बन्धं स्थापयति। परन्तु धार्मिकं तु विशिष्टदेव-स्तुतिभिस्सम्बद्धं भवति। देवानां विशिष्टाभिस्स्तुतिभिर्महिममण्डिताः काव्यप्रबन्धा

---

१. साहित्यदर्पणे - प्रथमपरिच्छेदे
२. ध्वन्यालोके ३-पृष्ठे- ३५५

वर्तन्ते। एतेषामपि उत्पत्तिहेतवो वेदा एव भवितुमर्हन्ति। मेघदूतं हि मुक्तककाव्येषु आदिमुक्तकं वर्तते। काव्यमिदं संस्कृतसाहित्यस्य जाज्वल्यमान-रत्नमिवाभाति। यस्मिन् धनपतेः कुबेरस्य शापेनास्तङ्गमितस्य यक्षस्य मनोव्यथायाः हृदयान्दोलनकारि वर्णनं विहितम्। मेघदूतं कालिदासस्य अन्तःप्रकृतेः सूक्ष्मं निरूपणं करोति। कञ्चिदचेतनं वस्तु प्रेमप्रसङ्गे दौत्यकर्मणे प्रेषणं, प्रणयकर्मणि प्रगाढोत्कण्ठातिरेकस्य सद्योऽभिव्यक्तिः प्रतिभावयतः कवेः मूलभूता कल्पना। भामहानुसारेण मेघचन्द्रशुकादयो यदा दूतरूपेण प्रेष्यन्ते ते वाक्शक्तिरहितत्वाद् वक्तुमेव न पारयन्ति तदा दूतप्रेषणेन को लाभः?

"अवाचोऽव्यक्त वाचश्च दूरदेशविचारिणः।
कथं दूत्यं प्रपद्येरन्निति, युक्त्या न युज्यते।"[1]

परन्तु कालिदासेन पूर्वं कथितम् - **कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।**[2]

अन्ततो भामहोऽपि- "यदि चोत्कण्ठया यत्तदुन्मत्त इव भासते तदा भवतु भूम्नेदं सुमेधः प्रयुज्यते।[3]

पार्श्वाभ्युदयमपि मेघदूतमिव मुक्तकत्वं भजते।
"तीव्रावस्थे तपति मदने पुष्पवाणैर्मदङ्गं,
तल्पे नाल्पं दहति च मुहुः पुष्पभेदैः प्रक्लृप्ते।
तीव्रापायत्वदुपगमनं स्वप्नमात्रेऽपि नापं,
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः।।"[4]

इति पद्ये मेघदूतमिव सहजता विद्यते। नेमिदूते नेमिनाथस्य तथा च तस्य पत्न्याः राजीमत्याः चरितं चित्रितम्। विरहविधुरायाः राजीमत्याः विरहवर्णनं करुणोत्पादकं वर्तते। शीलदूतमपि मुक्तकश्रेण्यां शोभामावहति। जैनमेघदूतं, चन्द्रदूतं, पवनदूतं, चेतोदूतं, हनुमद्दूतं, मणिपतिचरित् इत्यादीनि मुक्तकानि

---

१. काव्यालङ्कारे- १-४३
२. मेघदूते - पूर्वमेघे-५
३. काव्यालङ्कारे - १-४४
४. पार्श्वाभ्युदये - ४-३५

एव। हंससन्देशः वेदान्तदेशिकप्रणीता दूतरचना मुक्तककाव्यशृङ्खलायां प्रागल्भ्यं भजते। रूपगोस्वामिना हंसदूतं, वीरेश्वरेण वाङ्मण्डनगुणदूतं विनयप्रभुणा चन्द्रदूतं, विनयविजयगणिना चन्द्रदूतं, कृष्णचन्द्रतर्कालङ्कारेण चन्द्रदूतं, इन्दुदूतं च विनयविजयगणिना प्रणीतम्।

नीतिशतके उदात्तगुणान् गृहीतुमाग्रहं करोति कविः। येषामनुशीलनं मानवानां कृते मङ्गलसाधको वर्तते। तदनुसारेण यो जनो नरदेहमवाप्य सद्गुणानुपार्जयति सः जनो वैदूर्यमणिना निर्मिते पात्रे चन्दनकाष्ठेन लशुनं पचति।"

"मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।।"[१]

शृङ्गारशतके नारीणां हृदयपरीक्षणं कविः करोति प्रेरणाप्रभावितानां कामिजनानां चित्तेषु ललितक्रीडा वर्तते। वैराग्यशतके कवेः सर्वस्वं प्रतिभाति-

धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायता
आनन्दाश्रुकणान् पिबन्ति शकुना निःसङ्गमङ्केशयाः।
अस्माकं तु मनोरथोपरचितप्रासाद-वापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते।।[२]

अमरूकस्य समक्षं सामान्याः कवयो नैव स्थातुं शक्नुवन्ति। स नास्ति शब्दकविः अपितु स रसकविः। एकत्र पतिं परदेशं प्रति गमनोत्सुकं पश्यति तस्य पत्नी। तत्र कामिन्याः हृदयस्थिता विह्वलता दर्शनीया वर्तते। पत्युः शुभागमनस्य वृत्तं निशम्य सा हर्षिता। सः मुक्तकरचनायां सिद्धहस्तः कविः-

---

१. नीतिशतके - ७०

२. वैराग्यशतके - १५

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं,
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः।
यातुं निश्चितचेतसि, प्रियतमे सर्वे समं प्रस्थिताः।
गन्तव्ये सति जीवित प्रियसुहृत् सार्थः किमु त्यज्यते।[1]

पद्यमिदं काव्यप्रकाशे चतुर्थे उल्लासे प्रयुक्तं वर्तते। भल्लटशतकमपि मुक्तकमस्ति। यस्योदाहरणानि मम्मट-क्षेमेन्द्राभिनवगुप्तपादैः स्वस्वग्रन्थेषु स्वीकृतानि। गाथासप्तशती शृङ्गाररससमन्विता नूतनभावनाभिव्यक्तिपरिपूर्णा, गूढ़ार्थाभिव्यञ्जनासंवलिता वर्तते। अस्या उदाहरणानि ध्वन्यालोक-काव्यप्रकाश-रसगङ्गाधरलक्षणग्रन्थेषु विद्यन्ते। गोवर्धनाचार्येण आर्यासप्तशती प्रणीता। शृङ्गाररसपरिपूरितं मुक्तकमेतत्। विरहसंतप्ताया नायिकाया वर्णनं चमत्कारी आवर्जनपरं विद्यते।

"न स वर्णो न च रूपं न संस्क्रिया कापि नैव सा प्रकृतिः।
बाला त्वद्विरहादपि जातापभ्रंशभाषेव"।।[2]

जयदेवकृतं गीतगोविन्दं को न जानाति तत्तु एवंभूतं मुक्तकं विद्यते यद् द्वादश-सर्ग-समन्वितं संस्कृत-भारतीपरिपूरितं सौन्दर्यमाधुर्ययोः पराकाष्ठात्त्वं भजते। दर्शनीयं तत्र एकं पद्यम् -

मृगमद सौरभरभसवंशवदनवदल-मालतमाले।
युवजनहृदयविदारण मनसिजनखरुचिकिंशुकजाले।[3]

रूपगोस्वामिना प्रणीतं स्तवमालेति नाम मुक्तकं जगति प्रसिद्धं। गोविन्ददासेन विरचितं पदकल्पतरुमुक्तकं काव्यं विद्यते।

स्तोत्रसाहित्यं संस्कृतवाङ्मयेऽतिशयेन विलसति। शिवमहिम्नस्तोत्रं को न जानाति। यद्धि शिवस्य महिम्नः सन्दर्भे भाषालालित्यनिर्भरं दार्शनिकाध्यात्मपरं

---

१. अमरूकशतके - (काव्यप्रकाश-चतुर्थोल्लासे उदाहरणश्लोकः ३५)

२. आर्याशप्तशत्यां- ३४२

३. गीतगोविन्दे- १-४

शैवस्तोत्रं विद्यते। सूर्यशतकं मयूरभट्टेन स्रग्धराछन्दसा सुसज्जितम्। चण्डीशतकं वाणभट्टेन प्रणीतम्। शङ्कराचार्यस्य भजगोविन्दमिति तस्य कीर्तिकौमुदीं विस्तरीकरोति। सौन्दर्यलहरी शङ्कराचार्येण लिखिता-

"शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं।
न चेदेवं देवो न खलु कुशलः स्पन्दतुमपि।"[1]

तथा च-

"तनीयांसं पांसुं तवचरणपङ्केरुहभवं,
विरञ्चिः सञ्चिन्वन् विरचयति लोकानविकलम् "।[2] इति

मुकुन्दमाला कुलशेखरेण विरचिता वर्तते! तत्र केवलं चतुरधिकत्रिंशत् पद्यानि सन्ति तथापि मुक्तककाव्यश्रेण्यां सुषमामादधाति। यामुनाचार्येण आलवन्दारस्तोत्रं भक्तिभावेन हृदयेन, भगवनः समक्षं दैन्येन प्रस्तुतम्। लीलांशुकेन कृष्णकर्णामृतमिति ललितकाव्यं निबद्धम्। वेदान्तदेशिकेन पञ्चविंशतिः स्तोत्ररत्नानि प्रणीतानि। पादुकासहस्रम् अत्यन्तमेव प्रख्यातं स्तोत्रम्। वैङ्कटाध्वरिणा लक्ष्मीसहस्रं, सोमेश्वरेण कीर्तिकौमुदी, रामभट्टदीक्षितेन रामचामस्तवं, नारायणेन नारायणीयं, पण्डितराजजगन्नाथेन गङ्गालहरीति गीतिर्विरचिता। दुर्वाससः शम्भुमहिम्नास्तवः, लङ्केश्वरस्य शिवस्तुतिः, उत्पलदेवेस्य शिवस्तोत्रावली, कल्हणस्य अर्धनारीश्वर-स्तोत्रमित्यादीनि हि सर्वाणि मुक्तककाव्यानि वर्तन्ते। समासतः कथयितुं शक्यते यदेतद्वियुक्तं साहित्यं मुक्तकस्य श्रेयस्त्वं प्रदर्शयति। अत उक्तिरियं चरितार्था एव यत् काव्येषु मुक्तकं श्रेयः इति।

१. सौन्दर्यलहर्याम्- १

२. तत्रैव- २

पारस्करगृह्यसूत्रोक्तं कन्यायाः सुमङ्गलीत्वनिर्धारणम्

डॉ. सरोजकुमारशुक्लः
शोधसहायकः, संस्कृतविभागे,
लखनऊविश्वविद्यालये, लखनऊ

भारतीयसंस्कृतेः संस्कृतवाङ्मयस्य चाऽक्षुण्णपरम्परायां वेदानां नितान्त-गौरवपूर्णस्थानमस्ति। वेदानां सम्यग्ज्ञानाय वेदाङ्गानामध्ययनं परमावश्यकम्। वेदाङ्गेषु कल्पसाहित्यस्यान्तर्गतं चतुर्धा सूत्रसाहित्यं स्वीक्रियते-श्रौतसूत्रं गृह्यसूत्रं धर्मसूत्रं शुल्वसूत्रञ्च। एतेषु गृह्यसूत्राणाम् अन्तर्गतं गृह्यानुष्ठानसम्बन्धिकृत्यानि समाहितानि। एतेषामनुष्ठानानामन्तर्गतं संस्काराणामपि उल्लेखः कृतः-येषु उद्वाहसंस्कारस्य अतिमहत्त्वम्। पारस्करगृह्यसूत्रे उद्वाहसंस्कारस्य सन्दर्भे 'सुमङ्गली' इति शब्दः प्रयुक्तः। एतस्मात्पूर्वं ऋग्वेदे 'सुमङ्गली' इत्यस्य शब्दस्य उल्लेखो विहितः-

"सुमङ्गलीर्बिभ्रती देववीतिम्। इहाघोषः श्रेष्ठतमा व्युच्छ"।।[1]

अथर्ववेदेऽपि अस्योल्लेखः प्राप्यते-

"सा नो अस्तु सुमङ्गली"।।[2]

'सुमङ्गली' इति शब्दस्य व्युत्पत्तौ यदि विचारः क्रियते तर्हि 'सु' इति उपसर्गपूर्वकं 'मङ्ग्' धातुना अलच्प्रत्ययस्य योगेन स्त्रीत्वस्य च विवक्षायां 'ङीप्' इति प्रत्यययोगेनैषः शब्दो निष्पन्नो भवति-यस्यार्थः 'उत्तममङ्गलकर्त्रिनवोढा' इति भवति।

---

१. ऋग्वेदे १/११३/१२

२. अथर्ववेदे ३/१०/२

पारस्करगृह्यसूत्रानुसारं वैवाहिककृत्यस्यान्तर्गतं यस्मिन् काले वरेण कन्यायाः सीमन्ते सिन्दूरं पूर्यते तस्मिन् काले वरेण एतन्मन्त्रं पठ्यते-

"सुमङ्गलीरियं वधूरिमां समेत पश्यत
सौभाग्यमस्यै दत्त्वा याथास्तं विपरेतन"।।[1]

अभिप्रायोऽयमस्ति यत् हे उद्वाहस्य अधिष्ठातृदेव्यः! एषा वधूः मङ्गलकारिणी अस्ति। यूयं एकत्रीभूय समवेतरूपेण अस्याः अवलोकनं कुरुथ। अस्यै सौभाग्यं पुत्रादिकञ्च मङ्गलमयाशीर्वादं दत्वैव यूयं स्वस्थानं व्रजन्तु न तु विमुखं भूत्वा।

एष आशयोऽस्ति यत् सा स्वभाविजीवने मङ्गलकारिणी कल्याणकारिणी च वा स्थितिं प्राप्स्यति।

सौभाग्यशालिनीनवोढा वराय सदैव कल्याणकारिणी भवति। सप्तपदीकृत्ये एतदेव तथ्यं स्पष्टं कृतम् -

"एकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षड् ऋतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव।।"[2]

अर्थात् हे कन्ये! तव प्रथमं पदम् अन्नस्य, द्वितीयं शक्तेः, तृतीयं धनस्य, चतुर्थं सुखस्य, पञ्चमं पशूनां, षष्ठम् आर्तभोगस्य सप्तमं च सौख्यसम्पादनस्य निमित्तमस्ति। त्वं मम कर्त्तव्यपालने सहायिका भवतु।

यस्याः कन्यायाः पाणिग्रहण-संस्कारो भवति, तस्यां कन्यायाम् एतानि नैकानि शुभलक्षणानि प्राप्यन्ते यैः तस्याः सुमङ्गलीत्वं द्योतितम्-एतेषां लक्षणानां सुमङ्गलीत्वस्य निर्धारणे भृशं महत्त्वं भवति। शाङ्खायनगृह्यसूत्रे कन्येयमधोलिखितलक्षणोपेता प्रोक्ता-

"या लक्षणसम्पन्ना स्यात्। यस्या अभ्यात्मङ्गानि स्युः।
समाः केशान्तः। अवर्तावपि यस्यै स्यातां प्रदक्षिणी ग्रीवायाम् ।"[3]

---

१. पारस्करगृह्यसूत्रे १/८/९

२. तदेव १/८/९

३. शाङ्खायनगृह्यसूत्रे १/५/६-९

एतादृशैर्लक्षणैर्युक्ता कन्या 'सुमङ्गली'इति उच्यते। अन्यत्रापि कथितम्-

"रोमराजीस्वरो वर्णः प्रकृतिश्चलनं तथा।
एतत्सर्वे परीक्षेत सा कन्या गृहमण्डनम् ।।"[१]

एतादृशी सुमङ्गली कन्या गृहशोभा भवति। गदाधरेण पारस्करगृह्यसूत्रभाष्ये कन्यायाः सुमङ्गलत्वसन्दर्भे प्रोक्तम्-

"कन्यां कनकसम्पन्नां कनकाभरणैर्युताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषिया।।"[२]

आचार्यमनुनाऽपि कन्यायाः शुभलक्षणानां सन्दर्भे प्रोक्तम्-

"अव्यङ्गाङ्गी सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रियम् ।।"[३]

अर्थात् पूर्णाङ्गिनी, सुनामिका, हंसगामिनी गजगामिनी वा, सूक्ष्मलोमदन्तयुक्ता मृद्वङ्गी कन्यैव उद्वाहयोग्या भवति। सुमङ्गलीत्वान्तर्गतं तस्याः दीर्घायुषोऽपि कामना कृता-

जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा।
शतं च जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं
परिधत्स्व वासः।[४]

हे कन्ये! त्वं मया साकं निर्दोषरूपेण वृद्धावस्थापर्यन्तं निवासं कुरु। एतद् वस्त्रं धारयतु, मामभिशापाद् रक्षतु, पातिव्रत्यपूर्णा भूत्वा शतवर्षाणां आयुर्दायं लभस्व, पुत्रान् समुत्पाद्य धनराशिं सङ्ग्रहं कुरुस्व, हे आयुष्मतिएतद्वस्त्रं धारयतु।

---

१. शाङ्खायनगृह्यसूत्रे १/५/१० टीकायां पृष्ठे- २२

२. पारस्करगृह्यसूत्रे गदाधरभाष्ये पृष्ठे-११६

३. मनुस्मृतौ ३/१०

४. पारस्करगृह्यसूत्रे १/४/१२

सुमङ्गली नवोढा कन्या भविष्ये पुत्रवती भवति। अथ च सा सर्वेभ्यः कल्याणप्रदाऽङ्गीकृता-

"आ नः प्रजां जनयतु प्रजापति राजरसायसमनक्त्कार्यमा।
अदुर्मङ्गलीः पतिलोकमाविशः शं नो भव द्विपदे शं चतुष्पदे।।"[1]

या कन्या सुमङ्गलकारिणी भवति, सा पतिगृहे स्थिरतां लभते, यथोक्तमस्मिन् मन्त्रे-

"ध्रुवमसि ध्रुवाऽहं पतिकुले भूयासम् अमुष्यासाविति पतीनां
गृह्णीयादात्मनश्च।।"[2]

सुमङ्गलीत्वगुणयुक्तकन्यायाः पाणिग्रहणसंस्कारो येन पुरुषेण सार्धं सम्पन्नो भवति सः निरन्तरमभ्युदयं प्राप्नोति।

इत्थं पारस्करगृह्यसूत्रोक्तं कन्यायाः सुमङ्गलीत्वं तां शुभलक्षणयुक्तां मनुते। अर्वाचीनकालेऽपि कन्यागुणानां महत्त्वं स्वीकृतम्। सुमङ्गलकारिणीकन्या सर्वत्र सुखं समृद्धिं च प्राप्नोति।

---

१. गोभिलगृह्यसूत्रे २/१/५

२. तदेव २/३/९

अथ शोधाधिकारी

प्रो. रहसबिहारीद्विवेदी
जबलपुरम्, मध्यप्रदेशः

अर्थतश्छत्रशीलोऽपि यो योग्यः शाशितुं गुरोः।
छात्रं शिष्यं च तं नत्वा तच्छोधगतिमाश्रये।।

अथातः शोधच्छात्रजिज्ञासा।

शोधाधिकारी तु गुरुकृपयाऽनुकरणेन योग्यतया वोच्चाङ्कैस्सहाधिगत-स्नातकोत्तरोपाधिः, अलब्धसेवाकार्यः स शुल्कं पूरितावेदनपत्रः, उच्चाध्ययनावसरेऽन्यथा वा जाति दलादिमाध्यमेन शोधनिर्देशनैकशरण-गुरुचरणपरिचितो योग्यश्चाटुकारो वा 'छत्रादिभ्यो णः,' 'शासइदङ्हलो इति पाणिनिसूत्रयोर्व्युत्पत्तिलभ्य प्रवृत्तिमयः (गुरोर्दोषावरणं छत्रं तच्छीलमस्य, शासितुं योग्यः शिष्यः) काम्यनिषिद्धकर्मवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तो-पासनानुष्ठानेन निर्गतनिखिलस्वाभिमानः साधनचतुष्टयसम्पन्नोऽनुधित्सुः शोधाधिकारी।

काम्यानि- उपाधिप्राप्तिसेवोपलब्धादीनोत्कृष्टसाधनानि-उत्कोचानुशंसादीनि, निषिद्धानि गुरोः कोपसाधकानि तद्विरुद्धाचार्यसम्पर्कादीनि, नित्यानि- अकरणे प्रत्यवायसाधनानि-गुरुचरणा लिङ्गनशाकदुग्धचायताम्बूल धूमयष्टिकाद्यानयनादीनि, नैमित्तिकानि गुरोस्तत्सन्ततीनां वा जन्मदिनाद्यवसरे समुपायनीक्रियमाणानि मिष्ठान्नवस्त्रादीनि, प्रायश्चित्तानि-गुरोः कोपक्षयसाधनानि तन्निर्दिष्टकार्य-सम्पादनतद्गृहागमनतदादेशपालनेष्वस्खलितोपचारादीनि, उपासनानि पूर्वप्रस्तुत-श्चविषयसम्बद्धानेकशोधप्रबन्धानुहरणानुसरणादीनि। साधनचतुष्टयं नाम- (१) नित्यानित्यगुरुकार्यविवेकः, (२) समग्रच्छात्रवृत्तिभोगविरागः (कदाचित्सौभाग्याद्

गुरुचरणैश्छात्रवृत्तिभोगोऽनुमतस्तथापि-आकस्मिकनिधिविरक्तिस्त्वनिवा (३) गुरुनिर्दिष्टसर्वविधकार्य सम्पादनतितिक्षा, (४) शोधोपाधिसेवावाप्तिलोलुपत्वम्।

अभिनवानपि सर्वानधिकारान् सम्यग् विज्ञाय गुरुं प्रति क्रान्तिविद्रोहादि-दुर्गुणरहितोऽन्धभक्तिनवनीतलेपनादिसद्गुणसहितः, आत्मकल्याणमुद्दिश्य निजप्रतिद्वन्दिनं प्रतिभाशालिनं छात्रं प्रति गुरुमनसि तिरस्कारभावोत्पत्तौ नितान्तं निपुणः, सर्वविधोत्तरपुस्तिकापरीक्षणविचक्षणः, आज्ञा 'गुरूणामविचारणीया' 'गुरुर्ब्रह्मे'तित्यादिवाक्येषु कृतविश्वासः, वायुयानरेलयानाद्यारक्षणकोषालय-पत्रालय-मुद्रणालय-पुस्तकालय दूरभाषायकरादिकार्यालयलिपिकैस्तत्सम्बद्धा-धिकारीभिस्सह कृतप्रगाढपरिचयः, गुरोरल्पवयस्कसन्ततिविद्यालयमार्गादिज्ञाता, आपणकार्यचतुरोऽपि ग्रामतो गोधूमशुद्धघृताम्रादिवस्तुजातं स्वल्पमूल्येन विना मूल्यं वाऽनेतुं समर्थः, परब्रह्मस्वरूपिणमपि स्वं गुरुद्रुह्यतामाचार्याणां छात्राणां वा तर्जनाय छात्रनेतृभिः सह मैत्रीभावमुपगतः, गुरुविरोधिदलनिर्णयसंसूचनचतुरः, उक्तेषु गुणेषु सत्स्वपि कोटालाइसेंसादि प्रबन्धकपुत्रत्वं, मन्त्रिपुत्रत्वं वा सकलगुणमौलिभूतमिति कृत्वा तदभावे तथाविधसम्मान्यजनेन कृतप्रगाढपरिचयः किं बहुना कारस्वामिता मोपेडशालिशोधकर्तुर्योग्यता पयसि शर्कतापातवत् किन्तु सूत्रधारं पुत्तलिकेव, श्रुतिं स्मृतिरिव, ब्रह्मनिष्ठं वेदान्ताधिकारीव, मायामभिमानी जीव इव, नारीं कामीव, शोधनिर्देशकं गुरुमुपसृत्य तममनुसरतु 'गुरोः सदा कौपीनं क्षाल्यम्, 'पुच्छचालनस्यैव महत्तेत्यादि सर्वगन्धोक्तेः।

◆◆◆

पदप्रज्ञोपनिषद्

प्रो. रहसबिहारीद्विवेदी
जबलपुरम्, मध्यप्रदेशः

वार्तापत्रसम्पादक उवाच-

तवक्षेत्रे पदक्षेत्रे समवेताः पदेप्सवः।
सत्तापक्षा विपक्षाश्च किमकुर्वत तद्वद।।

वार्ताहर उवाच-

पदप्रज्ञं जनं ज्ञातुं भ्रमन् श्रीमन्नितस्ततः।
दृष्टवान् पदवन्तं तं बोधयन्तं दलं स्वकम्।

पदलिप्सुरुवाच-

पदप्रज्ञस्य का भाषा पदरक्षाविपश्चितः।
पदधीः किं प्रभाषेत किमासीत व्रजेत् किम्?

श्रीपदवानुवाच-

न जहाति यदा कामान् सर्वान् स्वार्थमनोगतान्।
आत्मन एव धने तुष्टः पदप्रज्ञस्तदोच्यते।।
दुःखे बहुसमुद्विग्नः सुखेषु शाश्वतस्पृहः।
युक्तरागभयक्रोधः पदधीर्जन्तुरुच्यते।।
सर्वत्रस्वजनस्नेहात् तत्तत्प्राप्य शुभाशुभम् ।
अभिनन्दति च द्वेष्टि च पदप्रज्ञाप्रतिष्ठितः।।

सदा संहरते नायं कूर्मोऽङ्गानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञापदस्थिताः।।
विषया न निवर्तन्ते सदाहारस्य देहिनः।
सुरादिजो रसोऽप्यस्य पदं लब्ध्वा प्रवर्धते।।
यततो ह्यपि कौलीनं पदस्थस्याविपश्चितः।
वार्तावहा विवर्णस्थे हरन्ति प्रसभं मनः।।
तेभ्य उत्कोचदानेन पदं रक्षति तत्परः।
वशे यत्सूच्यसञ्चारः पदं तस्य प्रतिष्ठितम्।।
ध्यायतो धनसम्प्राप्तिं सङ्गस्तस्यां हि जायते।
कुवृत्तिर्ज्ञायते लोकैर्विरोधस्तेन जायते।।
विरोधात्त्यागपत्रस्य याञ्चा भवति दुःसहा।
त्यागपत्रात्पदान्मुक्तः दुर्गतिं स्वां प्रपश्यति।।
रागद्वेषादियुक्तेभ्यः कृष्णराशिं समर्पयन्।
आत्मवश्यान् हि तान् कृत्वा पदं स्वीयं हि रक्षति।।
पदे समस्तकामानां सिद्धिरस्योपजायते।
प्रसन्नचेतसो ह्यासु धनं पर्यवतिष्ठते।।
न शान्तिः पदमुक्तस्य न जनतासमादरः।
धनाभावतयाऽशान्तिरशान्तस्य कुतः सुखम्।।
सौविध्यावासयानानां हरणं तस्य जायते।
शासनादेशतः सर्वं वायुर्नावमिवाम्भसि।।
तस्माद् विरोधिनः सर्वान् वशीकृत्य धनादितः।

पदं रक्षति तेभ्यो यः पदं तस्य प्रतिष्ठितम्।।

या निशा शूकदंशेषु जनतायाः समाप्यते।

वातानुकूलयुक्ता सा पदस्थस्य सुरादिषु।।

आपूर्यमाणं ह्यचलप्रतिष्ठं

समुद्रमापः प्रविशन्ति यद्वत्।

तद्वद्दले तस्य विशन्ति सर्वे

स शान्तिमाप्नोति न वीतसत्तः।।

विधाय कामान् यः सर्वान् पदप्रज्ञो हि सस्पृहः।

रागाभिमानसंयुक्तः स शान्तिमधिगच्छति।।

एषा पदस्थितिस्तात्! नैनां प्राप्य विमुञ्चति।

स्थित्वाऽस्यामन्तकालेऽपि राजसम्मानमृच्छति।।

मुक्तक संस्कृत काव्यों में कविसमय

प्रो. अभिराज राजेन्द्र मिश्र
पूर्व कुलपति,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालय

कविसमय (Poetic Conventions) का सर्वग्राह्य अर्थ है कवियों द्वारा प्रयुक्त रूढ़ियाँ। कविसमय, एक प्रकार से कवियों का स्वैराचार है जो मात्र स्वान्तः सुखाय होता है। कविसमय, कविता में किया गया वह अनन्यपरतन्त्र प्रयोग है जो किसी काव्यशास्त्रीय देशना की अपेक्षा नहीं करता। जब कोई कवि अपयश या कलङ्क को कज्जलगिरि तथा कीर्ति को शरच्चन्द्र की चन्द्रिका बताता है तो उसका अपना निरङ्कुश स्वारस्य है कोई शास्त्र-सम्मत वर्णन नहीं।

आचार्य मम्मट ने काव्यप्रकाश के मङ्गलाचरण में स्पष्टतः कहा है-

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।[१]

कवि की वाणी को, उसके रचनाकर्म को नियतिकृत नियमों अर्थात् वैधातृक नियमों से रहित तथा अनन्य-परतन्त्र बताया गया है। ब्रह्मा के बनाये संसार में प्रत्येक प्राणी का जीवन उसके पूर्व कर्मों के अधीन होता है। परन्तु कवि की वाङ्मयी-सृष्टि में कुछ भी कर्मविपाकाधीन नहीं होता। सब स्वतन्त्र होता है। आखिर क्यों! इसलिए कि कवि 'अपरवेधा' होता है। वह अपनी सृष्टि में पूर्ण स्वतन्त्र, अधिकृत, समर्थ एवं निरङ्कुश होता है। फलतः उसकी सृष्टि, उसकी अभिरुचि के अधीन होती है, जैसा कि प्रोक्त है-

---

१. काव्यप्रकाश १.१.

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते।।[१]

वस्तुतः कविता में किसी कवि की यही नियतिकृत नियम-रहित अनन्य-परतन्त्र अभिव्यक्तियाँ 'कविसमय' कही जाती हैं। जङ्गल में शेर-शेरनी का प्रणय कोई विलक्षण घटना नहीं है। उसके प्रणयासक्त होने पर अन्य वन्य जीव-जन्तु अपने-अपने व्यापारों में लीन रहते ही हैं। परन्तु कवि किस दृष्टि से इस घटना को देखता है? वह यूँ देखता है मानों सिंह के सिंही-प्रणय में आसक्त एवं शिथिल होने मात्र से ही सारे वन्य जीवों को खुली छूट मिल गई है। जो बब्बर शेर के भय-वश दुबके पड़े रहते थे, अब उनकी भी बन आई है। सारा जङ्गल 'अराजकता' से ग्रस्त हो उठा है-

कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत्सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः?
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो वर्तते।।[२]

कवि की यह विशिष्ट दृष्टि ही कविसमय है।

'समय' शब्द अनेकार्थक है। अमरकोश में दो बार इस शब्द को उद्धृत किया गया है। प्रथम काण्ड में 'समय' काल के पर्यायरूप में व्याख्यात है- **कालो दिष्टोऽप्यनेहाऽपि समयोऽप्यथ (पक्षतिः)** तृतीय काण्ड में इसके पाँच अर्थ बताये गये हैं- शपथ, आचार, काल, सिद्धान्त तथा संवित्।

समयाः शपथाचारकालसिद्धान्तसंविदः।

किरातार्जुनीयम् के 'न समयपरिरक्षणं क्षमं ते' काव्यांश में प्रयुक्त समय शब्द शपथ के अर्थ में है। तथापि 'वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः' में समय आचारार्थक है। समय 'एव करोति बलाऽबलम्' काव्यांश

---

१. अग्निपुराण ३३८.१०

२. काव्यप्रकाश ७.२२५

में समय कालवाचक है तो ध्वन्यालोक के प्रथमोद्योतगत 'न तत्समयाऽन्तःपाति' आदि अंश में प्रयुक्त समय का अर्थ है सिद्धान्त। स्वसमयेन जानाम्यहम् जैसे प्रयोग में समय शब्द ज्ञानार्थक है।

